विश्वविद्याग्रन्थमाला- 26
वेदवेदान्ताध्ययनशोधसंस्थानम्
(नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीनकेन्द्रीयसंस्कृतविश्वविद्यालयेन मानितम्)

श्रीविष्णुतीर्थ-श्रीसत्याभिनवतीर्थ-श्रीसुमतीन्द्रतीर्थविरचितः

# श्रवणद्वादशीनिर्णयः

सम्पादकः

**वि। प्रदीपसिंहाचार्यः चतुर्वेदः**

प्रकाशकः

**वेद-वेदान्ताध्ययनशोधसंस्थानम्.**
**वसन्तकुञ्ज,नवदेहली.**
**2024**

विश्वविद्याग्रन्थमाला- 26

**श्रवणद्वादशीनिर्णयः**

श्रीविष्णुतीर्थविरचितः

श्रीसत्याभिनवतीर्थविरचितः

श्रीसुमतीन्द्रतीर्थविरचितः

**सम्पादकः** : वि। प्रदीपसिंहाचार्यः चतुर्वेदः

**प्रकाशनम्** : वेद-वेदान्ताध्ययनशोधसंस्थानम्.

(नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन-केन्द्रीयसंस्कृतविश्वविद्यालयेन मानितम्) वसन्तकुञ्ज, नवदेहली.

**प्रथममुद्रणम्** : 2024

ISBN : **978-81-961293-8-5**

**पृष्ठसङ्ख्या** : 104

**प्रतयः** : 250

**मूल्यम्** : 150 **रूप्यकाणि**

**मुखचित्रविन्यासः** रघुनन्दनः

**मुद्रणालयः** : वागर्थ. बेङ्गलूरु

Vedic Vedantic Studies & Research Institute

# Śravaṇadvādaśī Nirṇayaḥ

**Authors:**

Śrī Viṣṇutīrtha
Śrī Sumatīndratīrtha
Śrī Satyābhinavatīrtha

**Edited by:**

C. R. Pradeepa simha achaya, chaturveda.

**Published by:**

Vedic Vedantic Studies & Research Institute

(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI
New Delhi) Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,
vasant Kunj, New Delhi-110070

2024

**Vishvavidyagranthamala -26**

# Śravaṇadvādaśī Nirṇayaḥ

**Authors:**

**Śrī Viṣṇutīrtha**
**Śrī Sumatīndratīrtha**

**Śrī Satyābhinavatīrtha**

**Edited by:**
vd. **C. R. Pradeepa simha achaya, chaturveda**.

**Published by:**

**Vedic Vedantic Studies & Research Institute**

(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi) Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,

**ISBN :** 978-81-961293-8-5

**Edition:** 2024

**copies :** 250

©: Publishers

**Price:** 50

**pages** 96

**printed by:** vagartha.Bangalore

## जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्

### पेजावरअधोक्षजमठः, उडुपि

# अनुग्रहसन्देशः

सनातनवैष्णवसम्प्रदाये व्रतानुष्ठानेषु 'श्रवणद्वादशी'व्रतस्य अतीव महत्त्वं वर्तते। द्वादश्याः नक्षत्रादिसंयोगेन शास्त्रसम्मतं सम्यङ्निर्णयं विना अनुष्ठानं पूर्णफलाय न कल्पते। एतदर्थं शास्त्रप्रमाणानां सूक्ष्मपरिशीलनम् अत्यावश्यकम्।

अस्मिन् विषये श्रीमध्वाचार्यानुजैःश्रीमद्विष्णुतीर्थश्रीपादैः, तथा श्रीसत्याभि-नवतीर्थश्रीपादैः, तथा श्रीसुमतीन्द्रतीर्थश्रीपादैश्च पृथक्पृथक् विरचितः श्रवणद्वादशीनिर्णयो नाम धर्मशास्त्रनिबन्धः अतीव श्रद्धया अत्र सम्पादितः। श्रीवामनावतारोप्यस्मिन्नेव योगो सञ्जातः। ग्रन्थत्रयेपि प्रमाण-वचनपुरस्सरं श्रवणद्वादशीयोगविचारः विमृष्टः। अस्य व्रतस्यानुष्टानं वामनप्रीतिकरम्।

सम्पादकः चतुर्वेदोपाह्वः श्रीप्रदीपसिंहाचार्यः बहुप्रयासेन प्राचीनानां ताडपत्रादीनां परिशीलनं कृत्वा, इमान् निर्णयग्रन्थान् सुसंस्कृत्य सुष्ठु सम्पादितवान्। तस्यायं सारस्वतयज्ञः, सम्पादनकौशलं, शास्त्रनिष्ठा च सर्वथा श्लाघनीया।

अस्य प्रकाशनेन आस्तिकानां, वैष्णवजिज्ञासूनां, व्रतमनुतिष्ठासूनाञ्च महदुपकारो भविष्यति। सम्पादकाय श्रीप्रदीपसिंहाचार्याय तथा प्रकाशकाय, एवम् अस्य ग्रन्थस्य अध्येतृभ्यः सर्वेभ्यः श्रीवामनाभिन्नश्रीरामविठ्ठलः समनुगृण्हातु।

**इत्यनेकनारायणस्मरणानि**

**श्रीविश्वप्रसन्नतीर्थश्रीपादाः**

# निदेशकवचनम्

भारतीयज्ञानपरम्परायां धर्मशास्त्राणां कालनिर्णयस्य च विशिष्टं स्थानं विद्यते। विशेषतः वैष्णवसम्प्रदाये 'श्रवणद्वादशी'व्रतस्य आचरणं नक्षत्रादियोगवशात् कदाचित् संशयास्पदं भवति। तस्मिन् समये शास्त्राणां सूक्ष्मविवेचनेन, प्रमाणानां समन्वयेन एव निर्णयः साध्यः।

अस्मिन् विषये श्रीमद्विष्णुतीर्थैः, श्रीमत्सत्याभिनवतीर्थैः, श्रीमत्सुमतीन्द्रतीर्थैश्च विरचिताः ग्रन्थाः एव परमोत्कृष्टं प्रमाणम्। अस्माकं हर्षस्य विषयोऽयं यत्, पण्डितः श्रीप्रदीपसिंहाचार्य-चतुर्वेदः बहुभ्यः प्राचीन-तालपत्रेभ्यः एतान् ग्रन्थान् सङ्गृह्य, सम्पादितवान् अस्ति।

प्राचीनज्ञाननिधेः संरक्षणं, आगामिपरम्परायै तस्य शुद्धरूपेण प्रापणं च अस्माकं संस्थायाः मुख्योद्देशः। व्रतनिर्णयानां सुलभतया अवगमाय अयं ग्रन्थः अतीव उपकारको भविष्यतीति दृढो विश्वासः।

अस्माकं संस्थायाः सर्वाङ्गीणोन्नत्यै कारणभूतानां, सततं प्रेरणाम् अनुग्रहाशिषश्च अनुगृहीतवतां प्रातःस्मरणीयानां श्रीपेजावरमठाधीश-श्रीमच्चरणानां पादारविन्देषु साष्टाङ्गप्रणामाः सविनयं समर्प्यन्ते।

अस्मिन् महति ज्ञानयज्ञे सम्पादकस्य श्रीप्रदीपसिंहाचार्यस्य निष्ठाम्, अध्यवसायं, गवेषणात्मकं दृष्टिञ्च वयं भृशं श्लाघामहे। सहृदयाः वाचकाः, विद्वांसः, जिज्ञासवश्च अस्य ग्रन्थस्य साहाय्येन धर्मानुष्ठाने साफल्यं प्राप्नुवन्तु इति आशासे।

**डा. विठोबाचार्यः**

# सम्पादकीयम्

'श्रवणद्वादशीनिर्णयः' इति नूतनोऽयं ग्रन्थः सम्पाद्य प्रस्तूयते इति महतो मोदस्य विषयः। श्रीमद्विष्णुतीर्थैः, श्रीमत्सत्याभिनवतीर्थैः, श्रीमत्सुमतीन्द्रतीर्थैश्च पृथक् पृथक् विरचितानां श्रवणद्वादशीनिर्णयग्रन्थानां सङ्कलनरूपोऽयं धर्मशास्त्रप्रबन्धः। एते त्रयोऽपि ग्रन्थाः अद्यावधि अप्रकाशिताः एव आसन्, इदानीं प्रथमवारमेव मुद्रणं गच्छन्ति इति अस्य प्रकाशनस्य महद्वैशिष्ट्यम्।

सनातनधर्मे व्रतोत्सवानां परम्परायां 'श्रवणद्वादशी'व्रतस्य अतीव विशिष्टं स्थानं वर्तते। भाद्रपदमासस्य शुक्लपक्षे द्वादश्यां श्रवण4नक्षत्रस्य योगे सति अयं महापर्वकालः सम्पद्यते। अस्मिन्नेव मङ्गलदिने साक्षान्भगवान् श्रीहरिः अदित्याः गर्भात् 'वामन'रूपेण अवतीर्णः इति पौराणिकी प्रसिद्धिः। श्रीमद्भागवतमहापुराणे अष्टमस्कन्धे पयोव्रतप्रसङ्गे अस्य स्पष्टमुल्लेखो दृश्यते यत् - "श्रोणायां ..... मुहूर्ते भिजिति प्रभुः..."इत्यादि । इयं तिथिः 'वामनजयन्ती'रूपेणापि आचर्यते। श्रवणनक्षत्रेण युक्ता इयं द्वादशी महतीं सिद्धिं, पापनाशञ्च करोति इति धर्मशास्त्रवचनानि।

अस्य ग्रन्थस्य अधिकोपयोगित्वाय अन्ते परिशिष्टद्वयं योजितमस्ति—

१. प्रथमपरिशिष्टे : अत्र विभिन्नेषु धर्मशास्त्रेषु प्रतिपादिताः श्रवणद्वादशी-विचाराः, तद्विषयकाः सूक्ष्मनियमाश्च सङ्कलिताः सन्ति।

२. द्वितीयपरिशिष्टे : भविष्य-वामन-गरुड-वराहादिपुराणेषु वर्णितं श्रवणद्वादशीव्रतविधानं, तस्य महिमा, श्रवणद्वादशीपूजाक्रमः तथा तद्दिने दीपदानमाहात्म्यञ्च सविस्तरं सङ्गृहीतानि सन्ति। एतेन आस्तिकानां व्रतस्य स्वरूपं फलञ्च सुस्पष्टं भवेत्।

प्रातःस्मरणीयेभ्यः मद्गुरुभ्यः श्रीपेजावरमठाधीशेभ्यः श्रीश्रीविश्वप्रसन्नतीर्थ-श्रीमच्चरणेभ्यः साष्टाङ्गप्रणामाः सविनयं समर्प्यन्ते ।

अस्य ग्रन्थस्य शोधने, सम्पादने, मुद्रणे च सर्वविधं साहाय्यं, प्रोत्साहनञ्च दत्तवद्भ्यः संस्थायाः निदेशकेभ्यः डा विठोबाचार्येभ्यः कृतज्ञतां सविनयं व्याहरामि । सन्ततं शास्त्रचिन्तने निरताः सहृदयाः विद्वांसः, हरिभक्ताश्च इमं नूतनग्रन्थं स्वधीत्य अनुगृह्णन्तु इति सप्रश्रयं प्रार्थये ।

विद्वद्वशंवदः

सि.आर्. प्रदीपसिंहाचार्यः चतुर्वेदः

# विषयानुक्रमणिका

| | |
|---|---|
| श्रीविष्णुतीर्थविरचितः श्रवणद्वादशीनिर्णयः | 1 |
| श्रीसत्याभिनवतीर्थविरचितः श्रवणद्वादशीनिर्णयः | 6 |
| श्रीसुमतीन्द्रतीर्थविरचितः श्रवणद्वादशीनिर्णयः | 11 |
| अज्ञातकर्तृकः साधनद्वादशीविचारः | 26 |
| श्रीकृष्णामृतमहार्णवे श्रवणद्वादशीविचारः | 32 |
| विश्वनाथप्रणीते स्मृतिसारसङ्ग्रहे - श्रवणद्वादशीनिर्णयः | 43 |
| अथ श्रवणद्वादशी | 43 |
| अथ श्रवणद्वादश्यादिविवेचनम् | 47 |
| भगवन्तभास्करे श्रवणद्वादशीनिर्णयः | 53 |
| भविष्योत्तरपुराणान्तर्गत- विजयश्रवणद्वादशीव्रतवर्णनम् | 55 |
| वामनपुराणान्तर्गतम् श्रवणद्वादशीव्रतविधानम् | 62 |
| विष्णुधर्मोत्तरपुराणान्तर्गतं श्रवणद्वादशीव्रतविधानम् | 70 |
| विष्णुधर्मोत्तरपुराणान्तर्गतं श्रवणद्वादशी-दीपदानमाहात्म्यम् | 71 |
| विष्णुधर्मोत्तरान्तर्गतं श्रवणद्वादशीप्रशंसावर्णनम् | 72 |
| श्रीगरुडमहापुराणान्तर्गतं श्रवणद्वादशीमाहात्म्यम् | 80 |
| भविष्यपुराणे श्रवणद्वादशीनिर्णयः | 81 |
| वराहपुराणान्तर्गतः श्रवणद्वादशीपूजाक्रमः- | 83 |
| वराहपुराणान्तर्गतम् श्रवणद्वादशीव्रतविधानम् | 94 |

# श्रीश्रीमदानन्दतीर्थभगवत्पादाचार्यानुज-

# श्रीविष्णुतीर्थविरचितः श्रवणद्वादशीनिर्णयः

**तत्र विष्णुधर्मोत्तरे रामः-**

उपवासासमनर्थानां किं स्यादेवमुपोषितम् ।

महाफलं महादेव तन्ममाचक्ष्व पृच्छतः ।

**शङ्करः**

या रामा श्रवणोपेताद्वादशी महती शुभा ।

तस्यामुपोषितःस्नातः पूजित्वा जनार्दनम् ।

प्राप्नोत्ययत्नात् मर्मज्ञा द्वादशद्वादशीफलम् ।

**भविष्योत्तरे युधिष्टिरः**

उपवासामर्थआनां सदैव पुरुषोत्तम ।

एका या द्वादशी पुण्यानां वदस्व ममानघ.

**कृष्णः** - मासि भाद्रपदे शुक्ले द्वादशी श्रवणान्विता ।

सर्वकामप्रदा पुण्याउपवासे महाफला ।

सङ्गमे सरितां स्नात्वा द्वादशीं समुपोषिता ।

समग्रं समवाप्नोति द्वादश द्वादशीफलम् ॥

द्वादशी श्रवणोपेता यदा भवति भारत ।

सङ्गमे सरितांस्नात्वा श्रवणादिस्नानजं फलम् ।

सोपवासं समाप्नोति नात्र कार्या विचारणा ।

**यमस्मृतौ**

यदा तु शुक्लद्वादश्यां नक्षत्रं श्रवणं भवेत् ।

नाम्नातु सा महापुण्द्वा दशी विजया स्मृता इति .

विष्णुरहस्ये

श्रवणेन समायुक्ता मासि भाद्रपदे हि या
द्वादशी सा महापुण्या दशी विजयास्मृता इति .
तस्यां स्नात्वा विधानेन सर्वतीर्थफलं लभेत् ॥
अर्चयित्वा अच्युतं भक्त्या लभते पुरुषोत्तमम् इति

स्कान्दे

मासि भाद्रपदे शुक्लद्वादशी श्रवणान्विता ।
महती द्वादशी ज्ञेया उपवासे महाफला ।
सङ्गमे सरितां स्नात्वा द्वादशी समुपोषिता ।
अप्सपा देवं चाप्नोतिद्वादश द्वादशीफलम् ।
बुधश्रवणसंयुक्ता सैव चेद् द्वादशी भवेत् ।
अत्यन्तं महती तस्यां दत्तं भवति चाक्षयम् ॥
अर्चयित्वा अच्युतं भक्त्या लभेत् पुण्यं दशाब्दिकम् ।
फलं दत्तं तत्कृतानां च  तस्यांदशगुणं भवेत् ॥

विष्णुधर्मोत्तरे

श्रवणद्वादशी योगे बुधवारो भवेद्यदि ।
अत्यन्तं महती नाम द्वादशी सा प्रकर्तिता ॥
स्नानं जप्यंतथादानं होमः श्राद्धं सुरार्चनम् ।
सर्वमक्षयमाप्नोति तस्यां भृगुकुलोद्वह ।
तस्मिन् दिने तथा स्नात्वा यत्र क्वचन सङ्गमे ।
सङ्गमस्नानजं नामफलं प्राप्नोत्यसंशयम् ।

श्रवणासङ्गमा सावे परपुष्टिप्रदाः सदा
विशेषाद्बादशीयुक्ता बुधयुक्ता विशेषतः ।
बुधश्रवणसंयुक्ता सैव चेद् द्वादशीभवेत् ।
अतीव महती तस्यां संवदन्तं तथाक्षयम् ।
श्रवणद्वदशीयोगे पूजयित्वाजनार्दनं
दानंचदत्वा विप्रेभ्यः सोपवासो जितेन्द्रियः ।
महानदीसङ्गमेषु प्रतिवर्षं युधिष्टिरः
चकार विधिवद्दानं ततोद्दिष्टान्तमागतः ।
अत्यन्तपरमुद्यानं दुर्लभं सर्वमानवैरिति ॥
बुधश्रवणसंयुक्ता द्वादशी सङ्गमोदकम् ।
दानं अन्यो(दस्यो)दनंरसमुपवासः । परोविधिः इति
सगरेण ककुत्सेन दुन्धुमारेण गाधिना ।
एतैश्चान्यैश्च राजेन्द्र कामदा द्वादशीकृता ।
यद्बादशी बुधयुक्ता श्रवणेन सार्धं
सा वैजयन्ती कथिता मुनिभिः नभस्ये ।
तामादरेण समुपोष्य नरो हि सम्यक्
प्राप्नोति सिद्धिमणिमादिगुणोपपन्नाम् ॥
("उदयानन्तरं यामव्यापिन्यो भाः प्रकीर्तिताः ।
मध्याह्नव्यापिनी श्रोणा सदोपोष्या विचक्षणैः ॥" [1]इति ॥)

---

1.अयं श्लोकः श्रीसुमतीन्द्रतीर्थैः स्वश्रवणद्वादशीनिर्णये उदाहृतः

[2] 17-पत्र

आचरितएकादशीव्रतस्य पृ पालनपूरणयोः इति धातोः सम्पूर्णं फलम् । व्याप्तिं नयतीति पारणशब्दार्थः । तथासति विष्णुधर्मोत्तरे

'पारणान्ते व्रतं प्रोक्तं व्रतान्तेपि प्रदो(न्दु)षणम् ।

असमाप्ते व्रते पूर्वे नैव कुर्याद् व्रतान्तरम् ' । इति निषेधात्

...........आरभ्य एकादशीव्रतम् । पारयित्वा कथन्यद् वा व्रतमारभ्यत इति चेत् सत्यम् । एकदेवताकत्वादुभयमप्यारम्भणीयमित्युक्तं भविष्योत्तरे

'एकादशीमुपोष्याथ द्वादशीमप्युपोषयेत् ।

न चात्र विधिलोपः स्यात् उभयोर्देवता हरिः' इति ।

**किञ्च नारदीये-**

यथानुप्राप्यतो वृक्षं द्वादश्यां वैष्णवं क्वचित् ।

एकादशी तथोपोष्या पापघ्नी श्रवणान्विता ।

उभयोर्देवता विष्णुः पारणे पुरुषोत्तमः ।

**विभेदोत्र न कर्तव्यो विभेदात् पतते नरः' ॥ इति ।**

ननु उभयदेवताकत्वात् नोभयदिवसव्रतस्य कर्तव्यता।अङ्गीकारे अतिव्याप्तिः स्यात् । कुतः श्रवणमिश्रितदशमी (हि)उपोषणे काल एवेति चेत् मैवम् । एकदेवताकत्वे नोभयदिवसव्रतकर्तव्यतानिरूपणवाक्यार्थं विचारयामः।

'एकादशीमुपोष्याथ द्वादशीमप्युपोषयेत्' इत्यनेनैकादशीश्रवणर्क्षयोरित्येवं उभयोरेकदेवतात्वं न विधिलोप इत्ययमर्थः सम्मतो यथा तथा दशमीश्रवणर्क्षयोरेकदेवता न प्रतीयते । 'दशमी यमदेवतान

---

2 पत्राणां पूर्वापर्यं नास्तीत्यतः न सङ्गतिलाभः ।

श्रोणा तु हरिर्देवता' इत्यनयोरन्योन्यदेवतात्वप्रतीतेः नातिव्याप्तिरिति । तस्माद्द्वादशी श्रवणेन सहोदयादपि (भि)उल्लङ्घ्यव्यापिनी चेत् सैवोपोष्या । तथैकदेवताकत्वश्रवणमिलित एकादश्युपोषणेन न व्रतद्वयसद्भावाच्च दशमी उक्तलक्षणेन श्रवणयुतापि भिन्नदेवताकत्वात् नोपेक्षणीयेत्येतत् सर्वं स्मृतिवाक्यानां पर्यालोचनया सुस्थिरमित्यशेषमतिमङ्गलम् ।

श्रीमदानन्दतीर्थोक्तसत्सिद्धान्तानुसारतः ।
व्याख्यातं स्मार्तवचनं विष्णुतीर्थैः हरिप्रियैः ॥

इति श्रीविष्णुतीर्थश्रीपादविरचितः श्रवणद्वादशीनिर्णयः समाप्तः

# श्रीसत्याभिनवतीर्थविरचितः श्रवणद्वादशीनिर्णयः

## श्रवणद्वादशीउपवासः

सर्वाधिकारिको निश्चयसामान्येन विधानात् । तथाहि-

द्वादशीं श्रवणोपेतां यो नोपोष्यात् सुमन्दधीः ।
पञ्चसंवत्सरकृतं पुण्यं तस्य विनश्यति ॥
उदयव्याप्ययोगस्तु तिथिनक्षत्रसम्भवः ।
आमध्याह्नो नचेत् सायं कुर्यात्तत्रैव पारणम् ॥ इति स्कान्दे ।
रवेरावर्तनादूर्ध्वं द्वादशीश्रवणे यदि ।
उपवासद्वयं कार्यमन्यथा नरकं व्रजेत् ॥ इति स्कान्दे
उत्तरावेधरहिता श्रोणा च द्वादशीयुता ।
व्याप्ता स्याद्यदि मध्याह्नं कुर्यात्तत्रैव पारणम् ॥ इति
द्वादश्याः श्रवणस्यापि मध्याह्नोपरि सङ्गमः ।
तदेवोपोषणं कुर्यात् न्यूनं चेन्नच कारयेत् ॥
इति स्मृतिसङ्ग्रहे
मध्याह्नव्यापिनी श्रोणा मध्याह्नव्यापिनी तिथिः ।
यदि नस्यात् तदा सापि नोपोष्या विष्णुतत्परैः ॥

अत्र पञ्चकालमध्यस्थितो अष्टादशघटिकात्मकमध्याह्नव्यापित्वस्योपवासप्रयोजकत्वे तथा सङ्गवकालात्मकमध्याह्नसम्बन्धस्योपवासप्रयोजकत्वे तथा सङ्गवकालात्मकमध्याह्नसम्बन्धस्योपवासप्रयोजकत्वे च 'उदयादभिजिल्लग्न'इति वाक्योकक्तदिनार्धमध्यन्दिनात्मकाभिजिल्लग्नव्यापित्वस्योपवासप्रयोजकत्वाभिधायकवचनविरोधात् । द्वैविध्यकथनानुपपत्तिश्चेत्यतो दिवसस्यार्धो मध्याह्नो विवक्षितः । --रवेरावर्तनादूर्ध्वम्- इति --मध्याह्नादूर्ध्वमप्यणु- इत्यादिप्रमाणात्

॥

ननु उदयव्याप्ययोगोस्ति—इत्यादि वचनात् फाल्गुनमासे भाद्रपदमासे पञ्चदशघटिकापञ्चदशफलात्मकअष्टमुहूर्तात्मकमध्यन्दिने श्रुतिवासरयोः सत्वे.पि पूर्वोक्ताष्टमुहूर्तात्मकमध्याह्ने तयोः सत्वाभावात् न कार्यमिति प्राप्तमिति चेन्न । अल्पदिनमानवतिमाद्यचतुर्दशघटिकाचतुर्दशपलात्मकसप्तममुहूर्तस्य दिनार्धत्वेन मुख्यमध्याह्नत्वम् । तत्र श्रुतिवासरयोरसत्वे मध्याह्नव्यापित्वेनोपवासः कार्य एव । तदुक्तम् -

उदयादभिजिल्लग्नव्यापिन्यौ श्रुतिवासरे ।

तत्रैवोपोषणं कार्यं मुहूर्ते सप्तमे.पि च ॥-- इति ॥

अस्यार्थः उदयमारभ्य द्वादशीश्रवणं च उभे दिनार्धाद् अष्टमुहूर्तात्मका अभिजिल्लग्नगामिन्यौ तत्रैवाभिजिल्लग्नगामित्व एवोपोषणं कार्यम् । तथा सत्पममुहूर्ते श्रुतिवासरे उदयमारभ्य अभिजिल्लग्नगामिन्यौ यदि तत्राप्युपोषणं कार्यमेव । ततो न्यूनत्वे मध्याह्नव्यापित्वाभावान्न कार्यमेवेति ॥

आग्नेयपुराणे.प्येवमुक्तम् ।-

सप्तसप्तघटिकाश्चैव सप्तसप्तपलानि च । उभयोः सप्तभागे.पि श्रवणद्वादशीफलम् ॥--

श्रवणद्वादश्योर्घटिकापलयोः साम्य एवोपवासे कृतेफलं ददाति। तयोरन्योन्यवैषम्ये द्वादशीश्रवणं च फलं न ददाति । किन्तु पापमेव । अतो एकस्योनत्वे उपवासो नकार्य इत्यर्थः ॥

-व्याप्तिश्च द्विविधा तत्र स्वरूपाच्च द्रवांशतः ।

तत्राद्यायां न सन्देहो द्वितीया च चतुर्विधा ॥

स्पर्शिनी विरहा गाढा सुगाढेति च कुम्भजा ।

त्रिंशद्भिः पञ्चदशभिः दशभिः पञ्चभिः क्रमात् ।
पलैर्न्यूना समाख्याता तत्राद्या च कृताकृता ॥
उत्तरा त्रिविधा व्याप्तिरुपवासविधौ मता ।
द्रवव्याप्तिरियं प्रोक्ता नदीव्याप्तौ तटं यथा ।
एकादशीविधौ चैव द्रवव्याप्तिरुदाहृता ॥
द्विविधा तत्र नोपोष्या वैष्णवी तिथिरुत्तमा -- इति ।

तिथिनक्षत्रयोर्वृद्धौ मध्याह्नस्य पञ्चदशपलानि न्यूनानि चेत् तदा द्रवांशतः मध्याव्याप्तित्वादुपवासो भवत्येव । षोडशपलानि न्यूनानि चेद् तदा द्रवांशतो मध्याह्नव्याप्तत्वाभावान्नोपवासः कार्यः । साम्ये दशपलानि न्यूनानि चेत्तदा द्रवांशतो मध्याह्नव्याप्तित्वादुपवासः कार्य एव । एकादशपलानि न्यूनानि चेत्तदा द्रवांशतो मध्याह्नव्याप्तित्वाभावादुपवासो न कार्यः । क्षये पञ्चदशपलानि न्यूनानि चेत्तदा द्रवांशतो मध्याह्नव्याप्तित्वादुपवासः कार्य एव । एवं मध्याह्नस्य षट्पलानि न्यूनानि चेत्तदा द्रवांशतो मध्याह्नव्याप्तितवाभावदुपवासो न कार्य एव । तिथिनक्षत्रयोः स्वरूपेण मध्याह्नप्याप्तौ सन्देहाभावादुपवासः सिद्ध एव । -मध्याह्नव्यापिनी श्रोणा—इति पूर्वोक्तप्रमाणात् । द्वादश्यां श्रवणस्य षष्टिघटिकात्वे एकोनषष्टिघटिकात्वे वा उपवासो न कार्य एव ष निषेधकबहुवचनात् । निरवकाशवचनाच्च । ।

-षष्ठिनाडी यदि श्रोणा जायते द्वादशीदिने ।
उपोषणं न कर्तव्यं कृते यात्यधरं तमः—इति ॥
षष्ठिनाडी यदि श्रोणा दृश्यते द्वादशीदिने ।
ये कुर्वन्ति नरा मूढा उपवासं नराधमाः ॥
ते नरा यान्त्यधोलोकं मूढा पितृगणैः सह ।
उपवासो न कर्तव्यो न कर्तव्यो मनीषिभिः । ।

पुत्रमित्रकलत्रादियशःकीर्तिश्च नश्यति ।
तस्मात् सर्वप्रयत्नेन न नरैः नरकभीरुभिः ।
उपोषणं न कर्तव्यमन्यथा नरकं व्रजेत् ॥
द्वादशीसहिता श्रोणा यद्यूना द्वादशी तदा ।
परतो हरिभं तर्हि नोपोष्या तत्ववित्तमैः ॥

उत्तरा द्वादशी यद्यूना श्रवणं पूर्वस्मिन् दिने उत्तराषाढावेधरहितं सम्पूर्णषष्ठिघटिकापर्यन्तं परस्मिन् वृद्धिवशात् किञ्चिच्छिष्टं तर्हि नोपोष्येत्यर्थः ॥

-उत्तराषाढमिश्रं तु श्रवणं तु परित्यजेत् ।
एकोनषष्ठिघटिकां श्रवणद्वादशीं त्यजेत् ॥
पूर्वत्र दिवसे पूर्णं परत्र श्रवणं पुनः ।
तदा नोपोषणं कार्यं द्वादश्यां विष्णुतत्परैः ।
विष्ण्वर्क्षं तु यदा पूर्णं द्वादशी विषमा भवेत् ।
उपवासो न कर्तव्यो गार्ग्यस्य वचनं तथा ।
धनिष्ठासहितश्रोणा कामेन द्वादशीयुता ।
ते उभे ऊर्ध्वमध्याह्नादुपोष्या विष्णुतत्परैः ॥-- इति कालादर्शे ।

श्रोणाया षष्ठिघटिकात्वे उपवासप्रतिपादकानां षष्ठिघटिका यदा श्रोणा ऊनैकापि च दृश्यते । श्रुतिश्च षष्ठिघटिका इति सम्पूर्णं षष्ठिनाड्यः तु इत्यादिनामापाततो निरवकाशत्वेन प्रतीयमानानां द्वादशीवृद्धिविषयत्वेन सावकाशत्वात् ॥ तेषां सावकाशत्वे ज्ञापकानि वचनानि ।

**पराशरः-**

-द्वादशी श्रवणं चैव मध्याह्नव्यापिनी यथा ।

तथैव षष्टिघटिका श्रवणद्वादशी भवेत् ॥

- तित्थर्क्षे .....प्राप्ते घटिका षष्टिसंयुता ।

उपोषणं च कर्तव्यमन्यथा नैव कारयेत् ॥--

वसिष्ठः –

श्रवणद्वादशी वापि घटिका षष्ठिपूर्णिमा ।

उत्तराषाढसंयुक्ता नोपोष्या विष्णुतत्परैः ॥

द्वादश्यामथ श्रोण्यां वा उभयोः षष्ठिनाडिका ।

श्रवणं नैव कुर्वीत द्वादश्यां समुपोषयेत् ॥

इति श्रवणमात्रस्य षष्ठिघटिकात्वप्रयुक्तोपवासनिराकरणमित्यर्थः । -द्वादशी षष्ठिघटिका श्रुतिषष्टिघटिर्भवेत् ॥

उपवासद्वयं कुर्यादकृत्वा दैवतं हतम्- इति ।

द्वादश्यामथवा श्रोण्यां वोभयोः षष्ठिनाडिका ।

उपवासद्वयं कार्यं श्रुत्यन्ते पारणं भवेदिति ॥

श्रुत्यन्ते अन्तिमभागे नतु तदवसाने । उर्वरितद्वादश्यामेवेत्यर्थः । अन्यथा द्वादश्यतिलङ्घनदोषः स्यात् ।

द्वादशद्वादशीः हन्ति द्वादशी चातिलङ्घिता इति दोषवचनादिति ॥

॥इति सत्याभिनवतीर्थविरचितः श्रवणद्वादशीनिर्णयः ॥

# श्रीसुमतीन्द्रतीर्थविरचितः श्रवणद्वादशीनिर्णयः

श्रीरामदेवमानम्य श्रवणद्वादशीव्रतम् ।
निर्णीयते श्रीशतुष्ट्यै सुमतीन्द्राख्यभिक्षुणा ॥

श्रवणद्वादश्याम् उपवासस्य कर्तव्यत्वे प्रमाणानि-

तत्र तावद् भगवत्पादैः कृष्णामृतमहार्णवे-
"एकादश्यां तु विद्धायां संप्राप्ते श्रवणे तथा ।
उपोष्या द्वादशी पुण्या पक्षयोरुभयोरपि ॥" इति ॥

**तथा नारदीये-**

"शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता ।
उपोष्या सा सदा विप्रैः महापातकनाशनी ॥" इति ॥

नारदीये रुग्माङ्गदचरिते द्वितीये अध्याये -
"एकादश्यां तु विद्धायां संप्राप्ते श्रवणे तथा ।
उपोष्या द्वादशी पुण्या त्रयोदश्यां तु पारणम् ॥" इति ॥

**मार्कण्डेये-**

"श्रवणर्क्षसमायुक्ता द्वादशी यदि लभ्यते ।
उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणम् ॥" इति ॥

कुर्यादिति शेषः । तथा-

"द्वादशी श्रवणोपेता यदा भवति भारत ।
सङ्गमे सरितां स्नात्वा यत्पुण्यं लभते नरः ॥
तत्फलं लभते मर्त्यो नात्र कार्या विचारणा ॥"

**तथा पराशरमाधवीये -**

"उपोष्या द्वादशी पुण्या विष्णवर्क्षेण समायुता ।

एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयम् ॥"

इति सार्धश्लोकौ श्रवणोपवासप्रशंसापरौ ॥

**माधवीये-**

"शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता ।

तयोरेवोपवासः स्यात् त्रयोदश्यां तु पारणम् ॥" इति ॥

तथा तत्रैव -

"एकादश्यां तु विद्धायां संप्राप्ते श्रवणे तथा ।

उपोष्या द्वादशी पुण्या सर्वपापक्षयावहा ॥" इति ॥

**तथा च गौतमः-**

"अनङ्गयुक्तद्वादश्यां वैश्वदेवर्क्षवर्जिता ।

श्रुतिर्भवेद्यदा तत्र कुर्याद्व्रतमुपोषणम् ॥" इति ॥

अनङ्गत्रयोदशी तिथिः । वैश्वदेवर्क्षम् उत्तराषाढा-नक्षत्रम् । श्रुतिः श्रवणम् ॥

**तथा धर्मसंहितायां-**

"द्वादशी श्रवणोपेता विष्णुप्रियकरी शिवा ।

वैष्णवद्वयसंयोगात् सैवोपोष्या महातिथिः ॥" इति ॥

**सुमन्तुः-**

"धनिष्ठासंयुते कुर्याच्छ्रवणद्वादशीव्रतम् ।

तत्कर्म सफलं ज्ञेयमिति प्राह प्रजापतिः ॥" इति ॥

**तथा माधवीये-**

"श्रवणेन युता चेत् स्याद् द्वादशी सा हि वैष्णवैः ।

स्मार्तैश्चोपोषणीया स्यात् पक्षयोरुभयोरपि ॥" इति ॥

**माधवीये ब्रह्मपुराणे-**

"एकादशी यदा शुक्ला द्वादशी श्रवणान्विता ।
उपोष्या द्वादशी पुण्या विष्णवर्क्षेण समन्विता ।
एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयम् ॥" इति ॥

अत्रापि पूर्ववदेव विधिरुन्नेयः ॥

एवं विधिः-

श्रवणद्वादश्युपवासाकरणे प्रत्यवायो निरूपितो भगवत्पादैः कृष्णामृतमहार्णवे –

"द्वादशीं श्रवणोपेतां यो नोपोषेत् सुमन्दधीः ।
पञ्चसंवत्सरकृतं पुण्यं तस्य विनश्यति ॥" इति ॥

**तथा च वाराहे-**

"द्वादशीं श्रवणोपेतामुपोष्य प्राप्नुयात् फलम् ।
द्वादशैकादशीतुल्यं न कुर्याद्यद्युपोषणम् ।
द्वादशैकादशीर्हन्ति नरके मज्जते चिरम् ॥" इति ॥

**सङ्ग्रहे अत्रिः-**

"श्रुत्वा ये पारणं कुर्युर्द्वादश्यां श्रवणं यदि ।
ते यान्ति रौरवं घोरं बालवृद्धातुरा अपि ॥" इति ॥

**तत्रैव जाबालिः-**

"द्वादश्यां श्रुतियुक्तायां ये कुर्युः पारणं द्विजाः ।
ते यान्ति नरकं घोरं बालवृद्धातुरा अपि ॥" इति ॥

अयं च श्रवणद्वादश्युपवासः श्रवणानक्षत्रस्य द्वादश्याश्च मध्याह्नकालसम्बन्ध एव कर्तव्यः ॥

तथा च विष्णुतीर्थश्रीमच्चरणाः-

"उदयानन्तरं यामव्यापिन्यो भाः प्रकीर्तिताः ।

मध्याह्नव्यापिनी श्रोणा सदोपोष्या विचक्षणैः ॥" इति ॥

भाः नक्षत्राणि इति छान्दसप्रयोगः । यद्यप्यत्र नक्षत्रस्यैव मध्याह्नव्यापनं प्रतीयते । न पुनर्द्वादश्या अपि । तथापि 'तिथयः पूर्वविद्धास्तु' इति पूर्वत्र 'पापकुसुलत्व वैष्णवे दिने' इत्युत्तरत्र च तिथीनामुपवर्णनादत्र नक्षत्राणि इति तिथीनां च सम्बन्धो अभिहितः ॥

तथा च दत्तात्रेयसंहितायां-

"मध्याह्नव्यापिनी श्रोणा द्वादश्या सह सङ्गता ।

उपोष्या द्वादशी तत्र वैश्वदेवर्क्षवर्जिता ॥" इति ॥

केचित्तु- भानि आसां सन्तीति नक्षत्रयुक्तास्तिथयः । 'अर्शादिभ्यो अच्' इति मत्वर्थीयाच्प्रत्ययः । तेन नपुंसक-लिङ्गत्वाभावो न दोषाय । एतच्च स्त्रीलिङ्गप्रयोगादेव ज्ञायते इति । अत्रापि तिथिनक्षत्रे श्रौते एवेति व्याचक्षते ॥

अपरे तु-

"श्रोणायां श्रवणद्वादश्यां मुहूर्तोऽभिजिति प्रभुः ।

सर्वनक्षत्रताराश्चक्रुस्तज्जन्मदक्षिणम् ॥

द्वादश्यां सविता तिष्ठन् मध्यन्दिनगतो नृप ।

विजया नाम सा प्रोक्ता यस्यां जन्म हरेर्विदुः ॥"

इत्र श्रवणयुतायां द्वादश्याम् अभिजिति मध्यन्दिने मुहूर्ते प्रभुर्भगवान् प्रादुर्बभूव । द्वादश्यां मध्यन्दिनगतः सविता तिष्ठतीत्यत्र 'श्रवणद्वादश्याम्' इत्युक्त्वा पुनः 'अभिजिति श्रोणायाम्' इत्यभिधानेन श्रवणानक्षत्रद्वादशीतिथ्योः उदया-दारभ्य मध्याह्नकालसम्बन्धः प्रतीयते । अत एव 'मध्यन्दिनगतः' इति

भागवतम् । 'अभिजिदिति मध्यन्दिनम्' इति टीका च । 'श्रोणायां श्रवणे मासि' इति टीकावचनं तु लक्षणया अर्थान्तरमभिप्रेत्य प्रवृत्तम् । यदा तु शुक्लद्वादश्यां नक्षत्रं श्रवणं यदि । श्रवणद्वादशी नाम सा प्रोक्ता मुनिपुङ्गवैः' इति माधवोदाहृतनारदीयवचने 'श्रवणद्वादशी' इति तिथिविशेषस्य योगरूढनाम इत्यभिमतम्, तदा 'श्रोणायाम्' इति श्रवणनक्षत्रे इत्येवं व्याख्यानमेव स्वरसम् । यदा तु 'फाल्गुने प्रोष्ठपद्यां वा पक्षयोरुभयोरपि' इत्यादिवचनात् श्रवणद्वादश्याम् इति पदे श्रवणानक्षत्रयुक्तद्वादश्यामिति केवलयोगेन प्रवृत्तमिति मतं तदा नक्षत्रस्याप्राधान्यप्रतीत्या मध्याह्नकालसम्बन्धप्रसक्तौ सत्यां तस्यापि तत्सम्बन्धप्रतिपत्तये अभिजिति श्रोणायाम् इति व्याख्येयम् ॥

भागवते मध्याह्नकाले श्रवणद्वादश्योरुभयोरपि सम्बन्धाभिधानं
कार्यान्तरोपयोगि दृष्टमिति ॥

अत्राप्युपवासव्रते समानन्यायाक्रान्त्यभिसंहितमित्येता अभिप्रायेण तदुदाहरणम् । अत एव द्वादश्याः श्रवण-सम्बन्धो मध्याह्नकालीन एव प्रशस्तो व्रतानुष्ठा इति सङ्ग्रहकृत् ॥ एवञ्च उक्तविष्णुतीर्थीयवचनस्य मध्याह्नकालसम्बन्धिश्रवणद्वादश्युपवासविधिपरत्वं स्फुटमवसितं भवतीत्याहुः ।

तथा च मरीचिः-

"उदयादभिजिल्लग्नगामिनी श्रुतिवासरौ ।
फाल्गुने प्रोष्ठपद्यां वा ह्युपोष्य व्रतमाचरेत् ॥"

इति श्रुतिवासरे श्रवणद्वादशीतिथौ उपोष्य व्रतं कुर्यात् 'पूर्वभान्ते तु पारणम्' इति ॥

अत्र मरीचिवचनेन श्रवणोपसर्जनद्वादशीतिथेः
अभिजिदाख्यमध्याह्नकालसम्बन्धः प्रतीयते ।
संवर्तवचने तु श्रवणनक्षत्रस्य द्वादशीतिथिविशेषणकस्य

आवर्तनशब्दितमध्याह्नकालसम्बन्धो ज्ञायते । आचष्टे चामुमर्थं

वराहपुराण-वचनम् । तत्र एकोनविंशाध्याये-

"उत्तरामिश्रिता श्रोणा नैवोपोष्या भवेद् व्रते ।

नापि मध्याह्नतो न्यूना लङ्घनार्हा भवेद् व्रते ॥

अतो मध्याह्नगा ग्राह्या विष्णुव्रतचिकीर्षुभिः ।

उत्तरावेधरहितं श्रवणद्वादशीतिथिम् ।

व्याप्नोत्युपरिमध्याह्नं कुर्यात् तस्यामुपोषणम् ॥

श्रोणा च द्वादशी वापि मध्याह्नात् पूर्वमेव तु ।

खण्डिता स्यात् तदा नैव द्वादश्यां समुपोषणम् ॥" इति ॥

लङ्घनार्हा उपवासायोग्या । व्रते तत्र कर्तव्यनियमविशेषे । उत्तरावेधरहितं उत्तराषाढानक्षत्रसंयोगहीनम् । तस्यां बौद्धप्राधान्येन द्वादश्यामित्यर्थः ।

उक्तं च दत्तात्रेयसंहितायां-

"मध्याह्नव्यापिनी श्रोणा द्वादश्या सह सङ्गता ।

उपोष्या द्वादशी तत्र वैश्वदेवर्क्षवर्जिता ॥" इति ॥

उदाहृतविष्णुतीर्थीयवचनेन च मध्याह्नव्यापिनी इति श्रोणाया व्यापनवचनं सम्बन्धमात्र तात्पर्यकम् । नतु सर्वा-वयवसमालिङ्गनपरम् । वह्निर्धूमं व्याप्नोति स व्याप्नोत्यचलम् इत्यादौ एकदेशसम्बन्धेऽपि व्यापनव्यवहारात् । अत एव-'अतो मध्याह्नगा ग्राह्या विष्णुव्रतचिकीर्षुभिः', 'उदयादभिजिल्लग्नगामिनी श्रुतिवासरे' इत्यादौ मध्याह्नकालस्पर्शमात्रमभिहितम् । तदुक्तमभियुक्तैः सङ्ग्रहे 'श्रवणद्वादश्यां तु उदयादिमध्याह्नगामिन्यामेवोपवासादि कुर्यात् ॥ नान्यदित्याह मरीचिः ।'

"उदयव्याप्ययो योगः तिथिनक्षत्रसंयुतः ।

आमध्याह्ने नचेत् सायं कुर्यात् तत्रैव पारणम् ॥" इति अन्यथा

सर्वमध्याह्नकालव्यापनाभिप्रायेण पञ्चदशनाडीमभिव्याप्नोति चेत्
तदैवोपवासः कर्तव्यः स्यात् । तथा च स्वाचारविरोधः ।
एवमेव-
"भवेदावर्तनादूर्ध्वं द्वादश्यां श्रुतिभं यदि ।
उपवासं तदा कुर्यात् पूर्वभान्ते तु पारणम् ॥
आसङ्गवमपि स्याच्चेत् द्वादश्यां श्रुतिभं यदि ।
यतीनां पारणं नेष्टं अन्ये भान्ते तु पारणम् ॥
भवेदावर्तनादूर्ध्वं द्वादश्यां श्रुतिभं यदि ।
न कुर्यात् पारणं तत्र पूर्वभान्ते तु पारणम् ॥
पूर्वमावर्तनादूर्ध्वं विष्णुभं यदि योगतः ।
ततोल्पा द्वादशी तत्र द्वादश्यामेव पारणम् ॥
सङ्गत्वात् परतो वृत्तौ श्रुतेः सत् पारणं न तु ॥"
आवर्तनशब्दार्थस्तु सङ्गत्वात्परकालः ।
कालमयूखे नारदीये-
"मुहूर्तत्रितयं वापि सङ्गवान्तमथापि वा ।
द्वादश्यां श्रवणर्क्षं चेत् सोपोष्या विष्णुतत्परैः ॥"
इति धर्मप्रवृत्तौ ॥
"मुहूर्तत्रितयं वापि सङ्गवे त्वनुवर्तते ।
श्रवणद्वादशी सा स्यादुपोष्या विष्णुतत्परैः ॥" इति ॥
"द्वादश्यां श्रुतियुक्तायां ये कुर्युः पारणं द्विजाः ।
ते यान्ति रौरवं घोरं बालवृद्धातुरा अपि ॥"
इत्यादि वचनानि निरवकाशानि प्रकृतार्थं साधयन्ति ॥

अत्रोदाहृतवचनेषु मध्याह्नशब्दः सङ्गवोपरितनापराह्णार्वाक्तनषड्घटिकात्मकाहरंशविशेषस्य योगरूढ्या वाचकः ।

तथा च व्यासः-

"मुहूर्तत्रितयं प्रातस्तावानेव तु सङ्गवः ।
मध्याह्नस्त्रिमुहूर्तस्स्याद् अपराह्णोऽपि तादृशः ॥
सायाह्नस्त्रिमुहूर्तस्तु सर्वकर्मसु गर्हितः ॥" इति ॥

शातातपोऽपि-'गोसा प्रभृति सूर्यस्थमुहूर्तस्त्रिद्वित्रादिभागात् पञ्चधा विभागस्य बहुश्रुतस्मृतिसम्मतत्वात् स एव मुख्यः' इति । स्मृतिकौस्तुभे च पञ्चधाविभागपक्ष एव सर्वशिष्टसम्मतः नान्यो द्व्यादिविभागादिपक्षाः । तत्रैव श्रुतेः-'पक्षपातभूयस्त्वात्' इति ॥ उदाहृतश्रुतिगतमध्यन्दिनशब्दश्चोक्तमध्याह्न कालपर्याय इति वक्ष्यते ॥

ननु "उदयादभिजिल्लग्नगामिनी श्रुतिवासरे ।
फाल्गुने प्रोष्ठपद्यां वा ह्युपोष्य व्रतमाचरेत्"

इति मरीचिवचने अभिजिच्छब्दस्तावद् दिनमध्यघटिकाद्वयात्मककाल विशेषार्थः ।

"मुहूर्तभेदेऽभिजिति क्रतुभेदे च पुंसि सः ।
नक्षत्रभेदे तद्युक्ता कालमात्रे च स त्रिषु (तु) ।
तत्र जातो पुमांस्तु स्यादभिजिद्विष्णुशक्तयोः ॥"

इति केशवाभिधानात्

"अह्नः पञ्चदशाभागा मुहूर्तास्तारकामयाः ।
दिवा पञ्चदश प्रोक्तास्ते निशायां तथा मताः ॥
अह्नौ शम्भो-ऽर्क-मित्र-मेघा-वसु-जल-विश्वा अभिजित (७)।

विरिञ्च-इन्द्र-ऐन्द्र-अग्नि-अनिल-वरुण-यम-भग तारा

दिवामुहूर्तास्युः ।।"

तथा च चिन्तामणौ मुहूर्तमार्तण्डे चोक्तम्-

"अह्नः स्युः शिव-सार्पमित्र-पितरौ-वसु-वारि-विश्वे-अभिजित्-के-

इन्द्रा एन्द्रोग्निः निशाचरा आप जलाधीश-अर्यमाख्य-भग सञ्ज्ञाः

पुराणकथिता ।।"

"रौद्रः श्वेतस्तथा मैत्र आरम्भगः सवित्री वैराजश्चाथ गान्धर्वः ।

अभिजिच्च रौहिणेयो बलविजयाख्यौ नैर्ऋतः शाक्तः ।

वारु भग देवत्यौ इति विज्ञेया दिवा मुहूर्तानि ।।"

अभिजिद्वैराजाश्च श्वेतसावित्रशक्रबलविजयाः शुभकार्यसिद्धिजनकाः । सत्यं प्रोक्ता पुराणज्ञैः इति विद्यामाधवीये ।। ज्योतिषग्रन्थे अह्नो अष्टममुहूर्तः स्यादभिजित्सञ्ज्ञाकरणात् ।

दशमस्कन्धे -

"तस्मिन् सन्ध्या..... समत्स्यं वीक्ष्य सकृज्जले ।

छिन्नेषुणा पातयन्तं सूर्ये अभिजिति स्थितः ।।"

इत्र 'अभिजिदिति दिनमध्यमुहूर्तः' इति टीकावचनात् ।

"अधुना अभिजिन्नाम योगो मौहूर्तिको अभ्यगात् ।

शिवायनस्त्वं सुहृदामाशु निस्तारयिष्यसि ।।"

इति तृतीयस्कन्धे ।

"मध्याह्नस्त्वभिजित्प्रोक्त आषाढोत्तर एव च ।

श्रवणस्यापि पूर्वार्धो विषुवच्चाभिजित् स्मृता ।।" इति

तात्पर्यवचनात् ।

'अभिजिद्योगो मध्यन्दिनमुहूर्त' इति टीकावचनात् ।।

अत्रैव प्रकाशिकायां-'अह्नो भागद्वयं विधाय प्रथमभागान्ते एकं नाडी उपरितनभागादौ एका नाडी गृहीता चेत् तन्नाडीद्वयम् अभिजिदिति ज्ञेयम्' इति 'मध्याह्नस्त्वभिजित्प्रोक्तम्' इति तात्पर्यविवरणाच्च । तथा च श्रवणनक्षत्रद्वादशीतिथ्योरुदयं सङ्गत्य दिनमध्यघटिकाद्वयसंस्पर्शन एव उपवासव्रतं कुर्यादित्यवगमात् । ततो न्यूनत्वे अपि श्रोणाया द्वादश्याः वा कथमुपवासव्रतमनुष्ठीयते । नापि 'मध्याह्नतो न्यूना लङ्घनार्हा भवेद् व्रते' इति वचनात् । एवमेवोदाहृतवचनेषु मध्याह्नशब्दः अह्नो मध्यः मध्याह्नः इति दिनमध्यघटिकार्थक एव ॥

आवर्तनशब्दोऽपि आवर्तेऽस्मिन् इति अधिकरणे ल्युडन्तः अहर्मध्यवाचक एवेति ततोऽप्यभिजिल्लग्नार्वाक्तनत्वे श्रवणद्वादश्योर्नोपवासप्राप्तिरिति चेत्-अत्राभिधीयते ।

"अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥"
इत्र भगवत्पादैः 'अहः अभिजिता' इत्यभिधाय
"सान्हा मध्यन्दिनेनाथ शुक्लेन च सपूर्णिमा ।
सविश्वाचयनेनासौ पूजितः केशवं व्रजेत् ॥"

इति प्रमाणे मध्यन्दिनशब्देन अभिजिच्छब्दो व्याख्यातः । 'अभिजिद्वासेरहौ अभिजिन्मध्यकालः स्यात्' इति दर्पणाभिधानात् ॥

यद्यपि "पञ्चधा पञ्चदशधा द्वेधा त्रेधा च वासरम् ।
विभक्तं मुनयः प्राहुस्तत्राद्यौ सम्मतौ मम ॥"

इति कालदर्शने,

"पूर्वाह्नः प्रहरः पूर्वो मध्याह्नः प्रहरस्ततः ।

अपराह्णस्तृतीयः स्यात् सायाह्नश्च ततः परः ॥"

इति गोभिलवचनादौ च अह्नो विभागाः बहुप्रकारा आवेदिताः । तथापि पञ्चधाविभागपक्षस्य बहुश्रुतिस्मृतिसम्मत-त्वात् एतमेवमाश्रित्य विधिनिषेधशास्त्राणि प्रवर्तन्ते । अत एवोदाहृत कालदर्शनवचने 'तत्राद्यौ सम्मतौ मम' इति पञ्चधाविभागः, पञ्चदशधाविभागश्च स्वसिद्धान्तत्वेनोक्तः ॥

**तथा च माधवीये-**

"प्रातः सङ्गवमाध्याह्नपराह्णासायमित्यसौ ।

तत्राहुः पञ्चधा भागो मुख्यो द्वित्रादिभागतः ॥" इति ।

तद्विवृतं स्मृतिमुक्तावली-'पूर्वाह्णो मध्याह्नो पराह्णो सायाह्न इति चतुर्धा विभागः । प्रातः, सङ्गव, माध्याह्न, पराह्ण, सायाह्नः' इति पञ्चधा विभागः । घटिकाद्वयस्यैकमुहूर्तत्वेन ।

"रौद्रश्चैत्रस्तथा मैत्रस्तथा सालकटः स्मृतः ।

सावित्रश्च जयश्चेति गान्धर्वः कुपस्तथा ॥

रौहिणश्च विरिञ्चश्च विजय एव तु ।

प्रातस्तु स स्मृतः कालो भागश्चाहुः सपञ्चमः ॥"

"सङ्गमस्त्रिमुहूर्तोऽथ मध्याह्नस्तत्समः स्मृतः ।

ततस्त्रयो मुहूर्ताश्च अपराह्णो विधीयते ॥

पञ्चमोऽथ दिवां सोऽयः सायाह्न इति संस्मृता ॥" इति ॥

समाम्नायान्तैश्च पञ्चोक्ताहर्विभागः तैत्तरीयब्राह्मणे-'देवस्य सवितुः प्रसवः प्रातः, मित्रस्य सङ्गवः, बृहस्पतेर्मध्य-न्दिनः, भगस्यापराह्णः, वरुणस्य सायम्' इति ॥

स्मृतिकौस्तुभे माधवीये चाभिहितम् । युक्तं च अभिमतं कालस्य

मध्याह्नत्वं मध्यन्दिनत्वं च । तथाहि मध्यं च तदहश्च मध्याह्न इति विशेषणसमासः । मध्यमहो मध्याह्न इति एकदेशसमासो वा । 'सङ्ख्यावि... यपूर्वस्याह्नस्य' इति ज्ञापकात् । 'राजाहस्सखिभ्यष्टच् (पा.सू.) इति टच् । 'अह्नोऽह्न एतेभ्यः' (पा. सू) इत्यन्हादेशः । 'रात्राह्नाहाः पुंसि' इति पुंस्त्वम् । तथा च प्रातस्सङ्गवकालयोः अपराह्नसायंकालयोश्च मध्ये विद्यमानत्वमस्तीति ॥ एतेन मध्यन्दिनशब्दोऽपि व्याख्यातः ॥ मध्यो मध्यंदिनं चास्मात् लुक् सद्यामोद्य दितात् तथा' इति वार्तिके हरदत्तेन मध्ये भव इत्यर्थे मध्यशब्दो मध्यं भावमापद्यते । दिनमिति चास्मात् प्रत्ययो भवतीति व्याख्यानेन मध्येभवे अहर्भागे मध्यन्दिनशब्दस्य प्रवृत्तिरिति प्रधानेऽपि मध्याह्नार्थको अभिजिच्छब्दो अभिहितः ॥

गीताभाष्योपात्तमध्यन्दिनशब्दश्च
सङ्गवोपरितनषड्घटिकात्मककालार्थः । छान्दोग्यभाष्ये द्वितीये
"उदयात्पूर्वमेवासौ भवत्प्रद्युम्ननामकः ।
पश्चाधारस्तदात्मासौ वासुदेवस्तथोदये ॥
आश्रयस्तु नृणां तत्र वराहः सङ्गवे तु सः ।
तत्र पक्षाश्रयो विष्णुस्तथा नारायणाभिधः ।
मध्यन्दिने समाधारो देवानां च ततः परम् ॥"

इत्र पूर्वत्र सङ्गवशब्दः, उत्तरत्रापराह्नाभिप्रायका । 'ततः परम्' इति वचनाच्च सदंशे निप्रत्ययात् ॥

"मां केशवो गदया प्रातरव्याद् गोविन्द आसङ्गव आत्तवेणुः ।
नारायणः पातु सदात्तशक्तिर्मध्यन्दिने विष्णुररीन्द्रपाणिः ॥
देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो माम् ॥
(भाग. ६स्कं)

इति भागवते माधवेति निरायुधमूर्तिः रविमण्डलगतकाले भगवन्मूर्तिः मामवेत् । इति पूर्वोत्तरसदंशेन षड्घटि-कायां कालस्यैव मध्यन्दिनत्वावेदनात् । 'बृहस्पतेर्मध्यन्दिन' इत्युदाहृततैत्तरीयब्राह्मणे सदंशन्यायेन अभिमतकालप्रतिपादनात् ।

"समानौ प्राह्णपूर्वाह्णौ समौ सङ्गतसङ्गवी ।
मध्यन्दिनं तु मध्याह्ने पराह्णः सायमव्ययम् ।
चरमाह्नस्तु सायाह्नः ॥"

इति रत्नाकरवैजयन्त्योः सङ्गवापराह्णसन्दष्टत्वाच्च ॥

भागवततात्पर्यटीकायां च 'मध्याह्नादिशब्देन घटिकाद्वयवाचित्वेनाभिजिच् छब्दितव्याख्यानं तु मुहूर्तपदसन्नि-धानाद् युक्तम् । 'सूर्ये चाभिजिति स्थितः' इति दशमटीकायां च दिनमध्यमुहूर्तवचनम् मुहूर्तपरसंयोजनाभिप्रायकम् ॥

नचात्रापि 'अभिजिल्लग्नगामिनी' इति लग्नपरमेव मुहूर्तार्थकमिति वाच्यम् । नानाभावात् । अस्माकं तु लग्न-शब्दः 'राशीनामुदये लग्नम्' इत्यमरे, 'लग्नराश्युदये क्लीबम् सक्तलज्जितयोस्त्रिषु' इत्यमरव्याख्यानोक्ताभिधानात् , 'लग्नस्तु न स्त्रियाम्' राशीनामुदये त्रिषु सूक्ते मत्तगजे तुरि' इति केशवनिघण्टौ च राश्युदयाद्यर्थकत्वाभिधानेऽपि 'पदकिसलयज्योत्स्ना' इत्यादौ चन्द्रकान्त्यर्थकस्यापि ज्योत्स्नाशब्दस्य कान्तिमात्रार्थकत्ववदुदयमात्रार्थकत्वस् याभ्युपगमे अभिजिदुदयगामिनी इति लाभेन सम्भवदर्थकः ॥

तथा च अस्मदभिमतमध्याह्नकालपराण्येव । तत्रैव निबन्धने 'प्रातः सङ्गवमध्याह्नपराह्णाः सायमित्यादौ मध्याह्नशब्दः सङ्गवोपरितनषड्घटिकात्मककाले योगरूढ्या प्रवृत्तः । 'पूर्वाह्णे वाथ मध्याह्ने यदि पर्व समाप्यते' इत्यादौ मध्याह्नशब्दः दिनमध्यगतावर्तनशब्दितनाडीपरः' इत्युक्तम् । तद्वदिहापि । अतः उदाहृतवचनजाता अभिजिन्मध्याह्नमध्यन्दिना

वर्तनशब्देषु सङ्गवोपरितनापराह्णार्वाक्तनषड्घटिकात्मकाहरंशविशेषवाचकत्वम् उक्ताभिधादिभिः स्थितमिति तत्रैव श्रवणनक्षत्रद्वादश्योः सम्बन्धे उपवासः कर्तव्य इति सिद्धम् ॥

"दिवार्धसंयुतां श्रोणां द्वादश्या सह सङ्गताम् ।
तामुपोष्या व्रतं कुर्याद् वामनस्यातिवल्लभाम् ॥"
"श्रवणं द्वादशी चैव मध्याह्नादूर्ध्वमप्यणु ।
तज्जयन्त्यामुपवसेत् न्यूनं नैव च कारयेत् ॥"

इति वचनं वामनजयन्त्युपवासानुष्ठातृविषयमिति स्फुटम् ॥

नन्वेवमपि शास्त्रान्तरेणैकादश्यां श्राद्धहोमब्रह्मयज्ञतर्पणादिकं न कर्तव्यमिति तावत् प्रतिपन्नम् । नित्यत्वे श्रवणद्वादश्यामुपवासस्य कर्तव्यत्वे तत्रापि श्राद्धहोमादिकं त्याज्यं स्यात् । नचात्राप्येकादशीवत् परदिने कर्तव्यत्वे प्रमाणमस्ति । तथाचाहातिक्रमादिना प्रत्यवायः प्रसज्येत इति चेन्न ।

"एकादशीमुपोष्याथ द्वादशीमप्युपोषयेत् ।
न तत्र विधिलोपः स्यादुभयोर्देवता हरिः ॥" इति
भगवत्पादोक्तेः ॥
"श्राद्धादिकं यः कुरुते संप्राप्ते हरिवासरे ।
तच्छ्राद्धं राक्षसैर्भोज्यम् ॥" इति च ॥
"तिलोदकं पिण्डदानं होमं श्राद्धं च तर्पणम् ।
आमश्राद्धं तथान्यच्च न कुर्याद्धरिवासरे ॥"

इत्यादिस्मृतिभिर्हरिवासरशब्दितैकादशीश्रवणद्वादश्योः श्राद्धादिकरणे प्रतिषेधेन मृताहातिक्रमप्रत्यवायाभावात् ॥ स्मर्यते चैकादशीश्रवणद्वादश्योर्हरिवासरत्वम् ।

"एकादशी हरिदिनं नक्षत्रं श्रवणं हरेः ॥" इति ।

"श्रवणद्वादशी विष्णोर्वासरः प्रीतिदा नृणाम् ॥"

तत्र कर्तव्यश्राद्धादिकं परेहन्येव कार्यम् । तदुक्तं प्रचेतसा-

"द्वादश्यामुपवासश्चेद् श्राद्धं तत्रापि वर्जयेत् ।

परेह्नि तत् प्रकुर्वीत श्राद्धाद्यं सूतकादिवत् ॥"

इति स्मृतिमुक्तावल्युक्तेः ॥

कालमयूखे-

"द्वादश्यां समुपोष्याथ त्रयोदश्यां तु पारणम् ।

निषिद्धमपि कर्तव्यमाज्ञेयं परमेश्वरी ॥" इति ॥

एतेनैव एकादश्युपवासोत्तरपारणानाचरणे एकादशीव्रतानुष्ठानस्य अङ्गविलोपः कस्मान्न स्यादिति चोद्यं प्रत्युक्तम् ।

"एकादशीमुपोष्याथ द्वादशीमप्युपोषयेत् ।

एकादश्युद्भवं पुण्यं सर्वं प्राप्नोत्यसंशयम् ॥"

इति स्कान्दे तत्समाधानात् ॥

श्रवणद्वादश्यामि क्वचिदुपवासाभावश्च तथा स्मर्यते च ।

"उदयद्वयसंस्पृष्टश्रोणायुक्ता हरिर्यदि ।

तदा नोपोषणां कार्यं वैष्णवैर्विष्णुतत्परैः ॥" इति ॥

"एकोणषष्ठिघटिका द्वादशी श्रवणान्विता ।

त्रिपञ्चफलसंयुक्ता नोपोष्या विष्णुतत्परैः ॥" इति ॥

"एकोणषष्ठिघटिका त्रयस्त्रिंशत्फलाधिका ।

श्रोणा भवेद्यदि तदा नोपोष्या द्वादशविते ॥

पर्वत्र दिवसे पूर्णा परत्र श्रुतिभं यदि ।

तदा नोपोषणां कार्यं द्वादश्या विष्णुतत्परैः ॥"

इति सर्वं सिद्धम् ॥

इति श्रीसुमतीन्द्रयतिकृतश्रवणद्वादशीनिर्णयः पर्यवसितः ॥

---

## अज्ञातकर्तृकः साधनद्वादशीविचारः

दैवज्ञचिन्तामणौ-

"द्वादशी शुक्ला कृष्णा वा यावत् सूर्योदयं भवेत् ।
नैवार्यति संस्कारैः योजनं तु कथञ्चन ॥
तन्न्यूना द्वादशी चेत् स्याद् आर्यभटेन निर्णयः ।
इति वेदविदः प्राहुः मुनयः शौनकादयः ॥" इति ॥

साधनीस्वरूपमाह वैष्णवरहस्ये स्कान्दे-

"नाड्यस्तिस्रो विनाड्यश्च पञ्च पञ्चघटी मता ।
(पञ्चाशद्धधिका मता इति पाठान्तरम्)
वर्तन्ते द्वादशी या सा साधनीत्युच्यते बुधैः ॥
तत्रैव पारणं कुर्यात् प्रयत्नेन सुराधिप ।
प्रमादादकृतात्मानो विप्रा निरयगामिनः ॥
तस्मात् सर्वप्रयत्नेन साधनीं साधयेत बुधः ॥" इति ॥

सा त्रिविधा। साधनी, अतिसाधनी, कलाभेदात् । तत्र साधनी पाद्मे अखण्डैकादशीमाहात्म्ये-

"त्रयोदशी कियन्मात्रा परतः क्षयगामिनी ।
घटी तावत् साधनी स्यात् द्वादश्यां स्मृतिदर्शिभिः ॥

आमध्याह्नाः क्रियाः सर्वाः उषःकाले समाप्य च ।
सङ्कोचेन सुरश्रेष्ठ साधनीं साधयेत् सुधीः ॥" इति वचनेनोक्ता ॥

अतिसाधनी-

"द्वादशी घटिकामात्रा वर्तते शुक्लकृष्णयोः ।
तत्रैव पारणं कुर्यात् प्रोक्ता साह्यतिसाधनी ॥" इति श्रीविष्णुपुराणे ॥

तृतीया-चन्द्रिकायां -

"शुक्ला वाप्यथवा कृष्णा यदि चेद् द्वादशी तिथिः ।
उदयात् प्राक् समाप्येत सा कला द्वादशी मता ॥
अष्टपञ्चाशद् घटिका दृश्यते द्वादशी यदि ।
कर्णप्रकाशयुक्ता द्वादशी नाडिका मता ॥
तत्रैव पारणं कुर्याद् वैष्णवो विष्णुतत्परः ।
अन्यथा कुरुते यस्तु स मूढो नरकं व्रजेत् ॥" इति ॥

नारदः-

"उदयात् प्राक् यदा राजन् घटिकाद्वितयावधि ।
समाप्यते द्वादशी या सा कलेत्यभिधीयते ॥"

ब्रह्माण्डे च-

"मिलित्वैकादशीशेषं द्वादशी ह्यरुणोदये ।
वर्तते चेत् कलामात्रा साधनी मुनिपुङ्गव ॥" इति ॥

स्कान्दे च-

"द्वादश्येकादशी विद्धा पञ्चाष्टघटिकोपरि ।

दृश्यते सा कला ज्ञेया वैष्णवागमवेदिभिः ॥" इति ॥
तथा-
"सूर्योदयं समारभ्य यावत् सूर्योदयावधि ।
तिथिशेषेण संयुक्ता द्वादशी षष्ठिनाडिका ॥" इति ॥
तिथिशेषेण एकादशीशेषेणेत्यर्थः ॥
तत्कार्याकार्यविचारो ब्रह्मपुराणे-
"शुक्ला वाप्यथवा कृष्णा साधनी द्वादशी भवेत् ।
साधनी साधयेत् प्राज्ञः महत्यपि च सङ्कटे ॥
अज्ञानाद्वा प्रमादाद्वा मात्सर्यात्... तुकादपि ।
न कुर्याद् वैष्णवश्रेष्ठो विष्णुद्रोही न संशयः ॥
सर्वाणि नित्यकर्माणि द्वादश्यामरुणोदये ।
कार्याणि विधिवत्तानि रात्रावपि न दुष्यति ॥
औपासनं वैश्वदेवं स्वाध्यायं पितृतर्पणम् ।
पित्रोः प्रत्याब्दिकश्राद्धं रात्रिशेषे तु कारयेत् ॥
आमध्याह्नाः क्रियाः सर्वाः रात्रावेव समापयेत् ।
पञ्च पञ्च उषःकालः सप्तपञ्चारुणोदयः ।
अष्टपञ्च भवेत् प्रातः शेषः सूर्योदयः स्मृतः ॥
आमध्याह्नाः क्रियाः सर्वाः उषःकाले समाप्य च ।
सङ्कोचेन सुरश्रेष्ठ साधनीं साधयेत् सुधीः ॥
नित्यानां गृह्यकर्माणां विधिरेषः सनातनः ॥" इति ॥
तथा वराहपुराणेऽपि-
"यदि च द्वादशी स्वल्पा नित्यं कर्म कथं तदा ।

होमश्चैव वैश्वदेवश्च कदा कार्यौ वदस्व तत् ॥
त्रयो भागास्त्रियामायाः तत्राद्यौ सन्त्यजेद्बुधः ।
भागे तृतीये स्नात्वा तु नित्यकर्माणि कारयेत् ॥
आमध्याह्नाः क्रियाः सर्वाः रात्रावेव विधाय च ।
स्वल्पायामपि भद्रायां पारणं रविदर्शने ॥
यदा सूर्योदयात् पूर्वं घटिकैकावशिष्यते ।
स वै सूर्योदयो नाम मुनिभिः परिकीर्तितः ॥
तत्पूर्वघटिकैका तु प्रातःकाल इतीरितः ।
माध्याह्निकं ततः कुर्यात् होमं सूर्योदये तथा ॥
वैश्वदेवं ततः कृत्वा ब्रह्मयज्ञं च तर्पणम् ।
आपोशनं विधायैव प्रतीक्षेद् रविमण्डलम् ॥
अरुणोदयतः पूर्वं कृतं स्नानं वृथा भवेत् ।
यतः पर्युषितं तत् स्यात् साधनद्वादशीं विना ॥
अर्थोदये च सङ्क्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
द्वादश्यामाब्दिके प्राप्ते कुतपो न ह्यपेक्षते ॥
तदा श्राद्धे तु पितरो यथा तुष्टा भवन्ति हि ।
तथा तृप्ता भवन्त्येव द्वादश्यामेव पारणात् ॥" इति च ॥
त्रयोदशीश्राद्धमपि अल्पद्वादश्यामेव कार्यम् ।
"त्रयोदश्यां मृततिथौ मातापित्रोः समागमे ।
यदि च द्वादशी स्वल्पा द्वादश्यामेव कारयेत् ॥" इति ॥
तथा स्मृत्यन्तरे-
"त्रयोदश्यां मृताहश्चेत् कलार्धा द्वादशी यदि ।

द्वादश्यामेव कर्तव्यं न दोषमुपगच्छति ॥
अल्पायामपि विप्रेन्द्र द्वादश्यामरुणोदये ।
स्नानार्चनक्रियाः कार्याः दानहोमदिसंयुताः ॥
एतस्मात् कारणाद्विप्र प्रत्यूषे स्नानमाचरेत् ।
पितृतर्पणसंयक्तं स्वल्पां दृष्ट्वापि द्वादशीम् ॥" इति ॥

दत्तात्रेयसंहितायां-

"शिलास्नानं प्रेतपिण्डं प्रेतश्राद्धानि सर्वशः ।
प्रेतदाहोऽस्थिचयनं दशाहे वेदिकाबलिम् ॥
मुण्डनं प्रेतपत्नीनां पुत्राणां प्रेतकर्मणि ।
एतानि प्रेतकार्याणि विना सर्वाणि कारयेत् ॥
नित्यानि श्रौतकर्माणि स्मृतिमूलानि यानि च ।
तानि सर्वाणि कार्याणि द्वादश्यामरुणोदये ॥" इत्यादि ॥

अतो नित्यनैमित्तिकानि औपासनहोमसन्ध्यावन्दनश्राद्धादीनि कर्माणि रात्रावपि कार्याणि । न प्रेतसंस्कारशिवनादीनि । तेषां साधनीलोपदोषो नास्ति ॥

पद्मपुराणे विष्णुः-

"रोगिणां सूतिकानां च उदक्या नृपवर्तिनाम् ।
देशभ्रंशे ग्रामदाहे विवाहादिमहोत्सवे ॥
एतेषां साधनीभङ्गो दोषोऽयं न कदाचन ॥" इति ॥

तथा च व्रतकाण्डे-

"प्रेतकर्मप्रवृत्तानां वैष्णवानां खगेश्वर ।
मृतजाताशौचवतां पङ्ग्वन्धभ्रंशमन्त्रिणाम् ॥

एतेषां साधनीलोपदोषस्तत्र न विद्यते ॥" इति ॥
ग्रन्थान्तरे-
"ब्रह्मपक्षं विजानीयाद् युगे बाह्ये कृताभिधे ।
सूर्यपक्षं द्वितीये दृग्गणितं द्वापरे तथा ॥
आर्यपक्षं युगे चान्ते जानीयात्तु विशेषतः ।
ब्रह्मावर्ते गयान्तं स्याद् भीमादि ब्रह्मपक्षतः ॥
गणितं तदादि रेवान्तं भवेद् दृग्गणितेन तु ।
रेवादिकं तु भद्रान्तमार्येण गणितं विदुः ॥
तदाद्यादक्षिणाम्बोधिं सूर्यपक्ष उदाहृतः ॥"
॥ इति साधनद्वादशीविचारः ॥
"द्वादशी शुक्लकृष्णा वा यावत्सूर्योदयं भवेत् ।
तदार्यलिखितसंस्कारैः योजनं न कदाचन ।
तन्न्यूना द्वादशी चेत् स्यात् तदार्येण विनिर्णयः ।
इति वेदविदः प्राहुर्मुनयः शौनकादयः ॥" इति ।

## श्रीकृष्णामृतमहार्णवे श्रवणद्वादशीविचारः

केचित्तु-

"दिनार्धसंयुता श्रोणा द्वादश्या सह संयुता ।

तामुपोष्या व्रतं कुर्याद्वामनस्यातिवल्लभाम् ॥"

"उदयादभिजिल्लग्नगामिनी श्रुतिवासरे ।

फाल्गुने प्रोष्ठपद्यां वा ह्युपोष्या व्रतं आचरेत् ॥"

इत्यादिवचनात् द्वादश्यां श्रोणायाः पञ्चदशघटिकाव्याप्त्या उपवासः कार्य इत्याहुः ।

एतद्वचनं विष्णुपञ्चकप्रारम्भकाले श्रोणाया द्वादशीदिनार्धसंस्पर्शे व्रतारम्भस्य प्राशस्त्यपरमित्याहुः । यद्वा श्रवणोपेतत्वं नाम उदयद्वयसंस्पर्शरहितश्रवणयुक्तत्वं विवक्षितम् । उदयद्वयसंस्पर्श-श्रवणोपवासस्य त्याज्यत्वात् ।

उक्तं च विष्णुरहस्ये -

"एवं श्रोणोदयद्वन्द्वस्पर्शिनी च यदा भवेत् ।

पूर्वेद्युर्वा परेद्युर्वा नोपोष्या पुण्यहानिदा ॥" इति ॥

तथाऽन्यत्र-

"उदयद्वयसंस्पृष्टा श्रोणायुक्ता हरिर्यदि ।

तदा नोपोषणं कार्यं वैष्णवैर्विष्णुतत्परैः ॥" इति ॥

श्रोणाया उदयद्वयसंस्पर्शनं नाम त्रयस्त्रिंशत्कलाधिकैकोनषष्टिघटिकावस्थानं विवक्षितम् । षष्ठिघटिकावस्थाने तु सुतरामुदयद्वयसंस्पर्शन-त्याज्यत्वम् ।

तदुक्तम्-

"एकोनषष्ठिघटिकात्रयस्त्रिंशत्पलाधिका ।

श्रोणा च पौर्णमासी च नोपोष्या विष्णुतत्परैः ॥" इति ॥

"एकोनषष्ठिघटिका त्रयस्त्रिंशत्पलाधिका ।

श्रोणा भवेद्यदि तदा नोपोष्या विष्णुतत्परैः ॥" इति च ॥ १६६ ॥

उमर्जी - द्वादश्यामतिरिक्तत्वे सम्पूर्णद्वादश्यामुपवासः कार्यमिति अभिधाय द्वादश्यां श्रवणयोगे एकादशीमुपोष्य द्वादशीमप्युपोषयेदित्याह - द्वादशीमित्यादिना ॥ मध्याह्नोपेतद्वादशीम् । मध्याह्नव्याप्तश्रोणायुतां उत्तराषाढवेधरहितां उदयद्वन्द्वसंस्पर्श-रहितां यः नोपोष्यात् स मूढधिरित्यर्थः ।

तदुक्तं गारुडे-

"द्वादशी श्रवणोपेता मध्याह्नव्यापिनी स्फुटम् ।

तामुपोष्या व्रतं कुर्याद्वामनस्यैव वल्लभाम् ॥" इति ॥

"उदयादभिजिल्लग्नगामिनी श्रुतिवासरे ।

फाल्गुने प्रोष्ठपद्यां वा ह्युपोष्या व्रतं आचरेत् ॥"

"दिनार्धसंयुता श्रोणा द्वादश्या सह सङ्गता ।

तामुपोष्या व्रतं कुर्याद्वामनस्यातिवल्लभाम् ॥"

"रवेरावर्तनादूर्ध्वं द्वादशीश्रवणयोस्तथा ।

व्याप्तयोरुपवासस्य यद्येकेनापि न कारयेत् ॥" इति स्मृतिसारे ॥

"शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता ।

तयोरेवोपवासश्च त्रयोदश्यां तु पारणम् ॥"

"दिनस्यार्धं यदा व्याप्ता श्रोणा पापप्रणाशिनी ।

कलालवविहीना चेदुपवासो न विद्यते ॥"

व्याससंहितायाम् -

"श्रवणद्वादशी यत्र मध्याह्नादूर्ध्वमप्यणु ।
तज्जयन्त्यामुपोष्यं स्यान्न्यूनं चेन्नैव कारयेत् ॥"

"द्वादश्यां श्रवणं चेत्स्यादुदयद्वयसंयुतम् ।
उत्तराषाढसंयुक्तं नैवोपोष्यं कदाचन ॥"

"उत्तराषाढसंयुक्तश्रवणद्वादशी यदि ।
सुरया बिन्दुना स्पृष्टं गङ्गाम्भ इव सन्त्यजेत् ॥"

"एकोनषष्ठिघटिकां श्रवणद्वादशीं त्यजेत् ।
एकोनषष्ठिघटिका यदि श्रोणा प्रदृश्यते ॥
द्वादशीसहिता वापि नोपोष्या विष्णुतत्परैः ॥"

संवर्ते -

"उत्तराषाढसंयुक्ता श्रोणा पुत्रस्य हानिदा ।
घटिकाद्वादशादर्वाक् शिष्टा ज्ञानस्य हानिदा ॥" इति ॥

"एवं श्रोणा दिनद्वन्द्वस्पर्शिनी च भवेद्यदि ।
पूर्वेद्युर्वा परेद्युर्वा नैवोपोष्यार्थहानिदा ॥"

"पूर्वेद्युरुत्तरामिश्रा परेद्युः सा यदा पुनः ।
मध्याह्नव्यापिनी ग्राह्या ज्ञानमोक्षफलप्रदा ॥" इति ॥

अत्र द्वादश्याः श्रोणायुक्तत्वं नाम उभयोः मध्याह्नव्यापित्वं उत्तराषाढवेधराहित्यं उदयद्वन्द्वसंस्पर्शित्वं कुत इत्यतः प्रमाणान्येतानि ज्ञेयानि ।

"श्रवणद्वादशीं पुण्यां नोपोष्याद्यः समाहितः ।

पञ्चसंवत्सरकृतं पुण्यं तस्य विनश्यति ॥"

"श्रुत्वा ये पारणं कुर्युर्द्वादश्यां श्रवणं यदि ।

प्रयान्ति रौरवं घोरं बालवृद्धातुरा अपि ॥"

इत्यादिना द्वादश्युपवासविधिर्ज्ञेयः ।

प्रत्यवायशास्त्रापरिज्ञानेन विमूढधीः ॥ १६६ ॥

उपेन्द्र - एवं द्वादश्या अतिरिक्तत्वे पूर्णद्वादश्यामुपवासं विधाय द्वादश्यां श्रवणयोगे उपवासः कार्य इत्याह- द्वादशीमिति ॥ मध्याह्नोपेतश्रवणद्वादशीम् । तदुक्तं-

"दिनार्धसंयुता श्रोणा द्वादश्या सह सङ्गता ।

तामुपोष्या व्रतं कुर्याद्वामनस्यातिवल्लभाम् ॥"

मरीचिः -

"उदयादभिजिल्लग्नगामिनी श्रुतिवासरे ।

फाल्गुने प्रोष्ठपद्यां वा ह्युपोष्या व्रतं आचरेत् ॥"

"रवेरावर्तनादूर्ध्वं द्वादशीश्रवणयोस्तथा ।

व्याप्तयोरुपवासस्य सशक्तो नाम कारयेत् ॥"

"मध्याह्नव्यापिनी श्रोणा द्वादश्या सममेव सा ।

उपोष्या द्वादशी पुण्या विष्णुव्रतपरायणैः ॥"

"शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता ।

तयोरेवोपवासश्च त्रयोदश्यां तु पारणम् ॥"

"दिनस्यार्धे यदा व्याप्ता श्रोणा पापप्रणाशिनी ।
कलालवावहीना चेदुपवासो न विद्यते ॥"
"श्रुतिस्तु द्वादशी वापि न तु मध्याह्नगोचरा ।
तत्रोपवासं कुर्वाणो निरयं प्रतिपद्यते ॥"
"एकोनषष्ठिघटिकां श्रवणद्वादशीं त्यजेत् ।
एकोनषष्ठिघटिका श्रोणा यदि प्रदृश्यते ।
द्वादशीसहिता वापि नोपोष्या विष्णुतत्परैः ॥" इति ॥
"घटिकाद्वादशादर्वाक् शिष्टा ज्ञानस्य हानिदा ।
श्रवणा द्वादशी यत्र मध्याह्नादूर्ध्वमप्युत ॥"
"द्वादश्यां श्रवणं चेत्स्यादुदयद्वयसंयुतम् ।
उत्तराषाढसंयुक्ता श्रवणद्वादशी यदि ॥
सुरया बिन्दुना स्पृष्टं गङ्गाम्भ इव सन्त्यजेत् ॥"
"उदयद्वयसंस्पृष्टा श्रोणायुक्ता हरिर्यदि ।
तदा नोपोषणं कार्यं वैष्णवैर्विष्णुतत्परैः ॥"
"अनङ्गयुक्तद्वादश्यां वैश्वदेवर्क्षवर्जितम् ।
श्रुतिर्भवेद्यदा तत्र कुर्याद्व्रतमुपोषणम् ॥"
"यदि च द्वादशी स्वल्पा श्रवणं चातिरिच्यते ।
तदा नोपोषणं कार्यम्..." ॥
इत्यादिना श्रवणोपवासविधिक्षयः ॥
"श्रवणद्वादशीं पुण्यां नोपोष्याद्यः समाहितः ।
पञ्चसंवत्सरकृतं पुण्यं तस्य विनश्यति ॥"

"श्रुत्वा यः पारणं कुर्याद्द्वादश्यां श्रवणे यदि ।

ते यान्ति रौरवं घोरं बालवृद्धातुरा अपि ॥"

"पूर्वेद्युरुत्तरामिश्रा परेद्युः सा यदा पुनः ।

मध्याह्नव्यापिनी ग्राह्या ज्ञाने मोक्षफलप्रदा ॥" इति निर्णयवचनानि ॥

इत्यादिना श्रवणोपवासविधिर्ज्ञेयः ।

प्रत्यवायश्रवणात् प्रत्यवायशास्त्रापरिज्ञानेन मूढधीरित्यर्थः ॥ १६६ ॥

कोनेरी-

एवमेकादश्याः दशमीवेधाभावे अतिवृद्ध्या द्वादश्याः उदयद्वयस्पर्शित्वे तत्रोपवासद्वयं कर्तव्यमित्यभिधाय तत्सहपठितश्रवणस्यापि अरुणोदयसमये उत्तराषाढवेधरहितत्वेन एकोनषष्ठिघटिकात्वे च त्रयोदश्यां किञ्चिदुर्वरीतत्वेऽपि मध्याह्नोपरितनद्वादशीसम्बन्धे श्रवणनिमित्तद्वादश्युपवासः कार्यः । अरुणोदयसमये उत्तराषाढवेधयुक्तश्रवणं चेत्तदा एकोनषष्ठिघटिकात्वे षष्ठिघटिकात्वे वा परदिने

किञ्चिदुर्वरीतत्वेऽपि मध्याह्नोपरिगामिन्यां द्वादश्यां श्रवणनिमित्तोपवासो न कार्य इति । उभयप्रकारमधिकारिणो ग्राहयितुमाह- द्वादशीं श्रवणोपेतामिति ॥ योऽधिकारी अरुणोदयसमये उत्तराषाढवेधरहितउदयद्वयस्पर्शरहितश्रवणयुक्तां मध्याह्नोपरिगां द्वादशीं नोपोष्यात् उपवासं न कुर्यात् । स मूढधीः मन्दबुद्धिः । तस्मात्सा श्रवणद्वादशी उपोष्या । तदुक्तम् -

"श्रवणर्क्षे तु सम्पूर्णे द्वादशी नास्तमाप्नुयात् ।

विजयं श्रवणं नाम तत्र कार्यमुपोषणम् ॥"

"जया भद्रादिना मिश्रा सम्पूर्णं श्रवणं तथा ।

उपवासद्वयं कार्यमगस्त्यः प्राह नान्यथा ॥" इति ॥

इत्यादिपुराणेषु यदा श्रवणमुदयद्वयस्पर्शापेतं अरुणोदयसमये उत्तराषाढपादान्त्यस्पृष्टं द्वादशी च मध्याह्नोपरिगा तदा श्रवणद्वादशी नोपोष्येति तन्त्रन्यायेन तमेव श्लोकमाह- द्वादशीं श्रवणोपेतामिति ॥ श्रवणोपेतां उक्तप्रकारेण उत्तराषाढविद्धश्रवणोपेतां द्वादशीं मध्याह्नोपरिविद्यमानद्वादशीं नोपोष्यात् तत्रोपवासं न कुर्यात् । यः तत्र उपवासं कुर्यात् स मूढधीः ज्ञानशून्यः उत्तराषाढदूषितश्रवण-युक्तत्वात् ।

तदुक्तं विष्णुतीर्थीये-

"अनङ्गयुक्तद्वादश्यां वैश्वदेवर्क्षवर्जिता ।
श्रुतिर्भवेद्यदि तदा नोपोष्या विष्णुतत्परैः ॥" इति ॥
"उत्तराषाढकणिका कलया यत्र दृश्यते ।
सा जयन्ती परित्याज्या शुना स्पृष्टं हविर्यथा ॥" इति ॥
"उत्तराषाढामिलितं श्रवणद्वादशीव्रतम् ।
सुराबिन्दुभिरासिक्तं तीर्थवच्चोभयं त्यजेत् ॥"
"षष्ठिनाडी यदा श्रोणा जायते द्वादशीदिने ।
उपोषणं न कर्तव्यं कृते यान्त्यधरं तमः ॥" इति ॥
"द्वादशीसहिता श्रोणा परतो यदि दृश्यते ।
उपवासो न कर्तव्यः कृते चान्द्रायणं चरेत् ॥" इति ॥
"द्वादशीसहिता श्रोणा यमुनाद्वादशी परा ।
परतो हरिभं तर्हि नोपोष्या विष्णुतत्परैः ॥"
इत्यादि वचनमुक्तं पुराणेषु ॥

उपोष्यद्वादश्या अनुपोष्यत्वे अनुपोष्यद्वादश्या उपोष्यत्वे च प्रत्यवायवचनमेकमेव । "पञ्चसंवत्सरकृतं पुण्यं तस्य विनश्यति" इति । तस्मादुत्तराषाढवेध-रहितोदय-द्वयस्पर्शरहितश्रवणद्वादश्यां प्राप्तायां श्रवणोपवासः कर्तव्यः । तथा उत्तराषाढवेध-सहितोदयस्पर्शोपेतश्रवणे मध्याह्नोपरिविद्यमानद्वादश्यां प्राप्तश्रवणोपवासो न कर्तव्य इति । "द्वादशी श्रवणोपेताम्" इति श्लोकोक्तभगवत्पादाभिप्रायं प्रकटीकर्तुमुभय-विधार्थसाधकानि पुराणवचनानीति ज्ञेयानि । एकादश्याः अरुणोदयसमये श्रवण-स्योत्तराषाढान्त्यपादसम्बद्धश्रवणस्योत्तराषाढवेधो भवति नान्यथेति ।

"अरुणोदयवेलायां अभिजित्स्पर्शसंयुता ।

श्रोणा चेत् षष्टिघटिका नोपोष्या विष्णुतत्परैः ॥"

इत्यादि प्रबलतमप्रमाणानां पूर्वमुदाहृतत्वात् नात्र पुनर्विविच्यते ।

ततश्च श्रवणस्योत्तराषाढवेधप्रकारः- यदा एकादश्यां षट्पञ्चाशद्घटिका उत्तराषाढा भवति परदिने अतिवृद्ध्या श्रोणा उदयस्पर्शिनी तदा अरुणोदयवेलायां श्रवणस्यो-त्तराषाढसम्बन्धेन वेधो भवति तदा तस्यां द्वादश्यां नोपवासः कार्यः । समवृद्धिपक्षे अपि एकादश्यां षट्पञ्चाशद्घटिकापर्यन्तं उत्तराषाढा द्वादश्यां पञ्चाशद्घटिकापर्यन्तं श्रवणं भवति तदाऽपि पूर्ववदरुणोदयवेधान्नोपवासः । हीनवृद्धिपक्षेऽपि एकादश्यां षट्पञ्चाशद्घटिकापर्यन्तं उत्तराषाढा द्वादश्यां सप्तपञ्चाशद्घटिकापर्यन्तं श्रोणा तदाप्य-रुणोदयसमये उत्तराषाढवेधत्वेन द्वादश्यां नोपवासः । एवं त्रिविधवेधे प्राप्ते द्वादश्यां श्रवणोपवासो न कार्य इति ।

अथ वेधाभावप्रकारः-

एकादश्यां त्रिपञ्चाशद्घटिकापर्यन्तं उत्तराषाढा द्वादश्यां षष्टिघटिकापर्यन्तं श्रवणं, त्रयोदश्यां अतिवृद्ध्या किञ्चिदुर्वरीतं भवति तदा अरुणो-दयवेलायां उत्तराषाढवेधाभावेनोपवासः कार्यः । समवृद्धिपक्षेऽपि एकादश्यां

चतुःपञ्चाशद्घटिकापर्यन्तं उत्तराषाढा द्वादश्यां एकोनषष्ठिघटिका श्रोणा तदापि अरुणोदयवेधाभावेन उपवासः कार्यः । हीनवृद्धिपक्षेऽपि एकादश्यां पञ्चपञ्चाशद्घटिकापर्यन्तं उत्तराषाढा द्वादश्यां सप्तपञ्चाशद्घटिकापर्यन्तं श्रोणा । तदापि वेधाभावेनोपवासः कार्य इति । उपवसानुपवासप्रतिपादकवचनानां सामञ्जस्यं ज्ञेयम् । किञ्च यदा श्रोणा वृद्धया एकोनषष्ठिघटिका षष्टिघटिका भवति तदैव उत्तराषाढवेधो वेधाभावश्च भवति । नान्यत्र । अन्यथा श्रवणस्योत्तराषाढवेधावेध-प्रतिपादकवचनानां दत्तजलाञ्जलिता स्यादिति ॥ १६६ ॥

स्मृ. कृष्णाचार्य -

एवं विद्धैकादश्यामुपवासः द्वादश्यां कर्तव्यः । तथा परदिने द्वादश्यतिरेके द्वादश्यामप्युपवासः कर्तव्य इत्यत्र प्रमाणान्युक्त्वा केवलद्वादश्यां मध्याह्नसमये श्रवणयोगश्चेत्तदाप्युपवासः कर्तव्यः । तदकरणे प्रत्यवायस्य, करणे फलाधिक्यस्य च सत्त्वादित्यत्र वचनान्याह- द्वादशीं श्रवणोपेतामिति ॥

"दिनार्धसंयुत श्रोणां द्वादश्या सह सङ्गताम् ।
तामुपोष्या व्रतं कुर्याद्वामनस्यातिवल्लभाम् ॥" इति ॥

मरीचिः -

"उदयादभिजिल्लग्नगामिनी श्रुतिवासरे ।
फाल्गुने प्रोष्ठपद्यां वा उपोष्या व्रतं आचरेत् ॥"

इत्यद्युक्तप्रमाणेन द्वादशी मध्याह्नस्पृष्टद्वादशी मध्याह्नपर्यन्तं उक्तश्रवणेनोपेतां युक्तां तिथिं यः नोपोष्यादुपवासं न कुर्यात् स मन्दधीः । तस्य तादृशस्य पुरुपस्य पञ्चसंवत्सरकृतं पञ्चसंवत्सरादारभ्य सम्पादितं पुण्यं विनश्यति । यद्वा स्वकृतानेकवर्षमध्ये पञ्चसंवत्सरकृतं पुण्यं विनश्यति । तस्मादुदयमारभ्य मध्याह्न-काले श्रवणद्वादश्योर्योगे वैष्णवेनोपवासः कर्तव्य इति ।

अत्रापि केचिन्मध्याह्नशब्देन सङ्गत्वात्परतः कालमङ्गीकृत्योपवासं कुर्वन्ति । तदपि चिन्त्यम् । उक्तवचनविरोधात् । तदकरणे प्रत्यवायसमाख्यवचनानि ।

तथा विष्णुधर्मोत्तरे -

"श्रवणद्वादशीं पुण्यां नोपोष्याद्यः समाहितः ।
संवत्सरकृतं कर्म तत्क्षणादेव नश्यति ॥"

अत्रिः -

"ये श्रुत्वा पारणं कुर्युर्द्वादश्यां श्रवणं यदि ।
ते यान्ति रौरवं घोरं बालवृद्धातुरा अपि ॥"

तथा जाबालिः -

"द्वादश्यां श्रुतीयुक्तायां ये कुर्युः पारणं द्विजाः ।
ते यान्ति रौरवं घोरं बालवृद्धातुरा अपि ॥" इत्यादि ॥

न केवलं प्रत्यवायश्रवणात् तत्कर्तव्यं अपितु करणे फलाधिक्यश्रवणाच्च तत्कर्तव्यमित्यभिप्रेतम् ।

धर्मसंहितायाम् -

"यदा तु शुक्लद्वादश्यां नक्षत्रं श्रवणं भवेत् ।
तन्नक्षत्रे चोपवासः एकादश्ययुतं फलम् ॥" इति ॥

नारदीये -

"शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता ।
तत्रोपवासं कुर्वीत एकादश्ययुतं फलम् ॥" इति ॥

तथा चाकरणे प्रत्यवायस्य करणे फलाधिक्यस्य सत्त्वात् श्रवणद्वादशीव्रतं उभयोर्मध्याह्नयोगे एव उपवासः कर्तव्यः । तदभावे उपवासो न कार्य इत्यभिप्रेतम् ।

तत्र-

"उदयद्वयसंस्पृष्टश्रोणायुक्ता हरिर्यदि ।

तदा नोपोषणं कार्यं वैष्णवैर्विष्णुतत्परैः ॥" इति ॥

"अनङ्गयुक्तद्वादश्यां वैश्वदेवर्क्षवर्जिता ।

श्रुतिभवेत्तदा तत्र कुर्याद्व्रतमुपोषणम् ।

यदि च द्वादशी स्वल्पा श्रवणं चातिरिच्यते ।

तदा नोपोषणं कार्यम्..." ॥

इत्युभयविधवेधरहितश्रवणद्वादश्यामुपवासः कर्तव्य इति ॥ १६६ ॥

# विश्वनाथप्रणीते स्मृतिसारसङ्ग्रहे - श्रवणद्वादशीनिर्णयः

## अथ श्रवणद्वादशी

तत्र नारदीये -

शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता ।
तयोरेवोपवासश्च त्रयोदश्यान्तु पारणम् ॥

मात्स्ये -

द्वादश्यां शुक्लपक्षस्य नक्षत्रं श्रवणं यदि ।
उपोष्या द्वादशीं तत्र हरिमभ्यर्चयेन्नरः ॥

विष्णुधर्मोत्तरे-

नभसः शुक्लद्वादश्यां नक्षत्रं श्रवणं भवेत् ।
तस्यां तीर्थेषु यत्स्नानं तदनन्तं फलं लभेत् ॥
देवतापूजनं विप्रभोजनं श्राद्धमेव च ।
एकं जप्त्वा सहस्रस्य जपस्य फलमश्नुते ॥
स्नानञ्च महदल्पञ्च सहस्रगुणितं भवेत् ।
होमस्तत्रोपवासश्च सहस्रगुण उच्यते ॥

ननु यदा एकादश्युपवासश्चेत्युभयमेकस्मिन् दिने प्राप्नोति तस्योभयस्यान्योन्यविरोधाभावात् सहैवानुष्ठानं भविष्यति । यदात्वेकादश्यां पृथगुपवासः सम्पूर्णत्वेन द्वादश्यां पृथक् तदोपवासद्वयं कर्त्तव्यम् । तदुक्तम् अनन्तभट्टीकारेण विष्णुधर्मे -

एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
न चात्र व्रतलोपः स्याद् उभयोर्देवता हरिः ॥

नन्वेकं व्रतमसमाप्य व्रतान्तरमनुष्ठातुमशक्यम् असमाप्ते व्रते पूर्वेणैव कुर्यात् व्रतान्तरम् इति शास्त्रात् समाप्तिश्च विधिलोपं प्राप्नोति नैवम् । अद्भिः पारणं कृत्वा द्वितीयोपवासश्चोपवासानन्तरं शक्यत्वात् तादृशं परिमाणमशितानशितोभयात्मकं तत्राशितानशितत्वात् पूर्वोपवासः समापयति । अनशितरूपत्वेनोत्तरोपवासं न निन्दति । तथाह -

अशितानशितं यस्मात् तपोबिन्दुभिरीरिताः ॥

इति स्मरणात् उदकपारणनोपवासद्वयं निर्वाह्य यदा उपवासद्वयाशक्तस्तदा केवलद्वादश्युपवासेनोभययोः फलं सिद्ध्यति ।

**तदुक्तं माधवीये -**

एवमेकादशीं भुक्त्वा द्वादशीं समुपोषयेत् ।
पूर्वोपवासजपुण्यं सर्वं प्राप्नोत्यसंशयम् ॥

अस्यार्थः यदा द्वादश्यां श्रवणानक्षत्रं भवेत्तदा शुक्लैकादशीमपि परित्यज्य द्वादश्यामेवोपवसेत् ।

**वह्निपुराणे -**

दशम्येकादशीमिश्रा नोपोष्या नरकप्रदा ।
श्रवणेन तु संयुक्ता सा शुभा सर्वकामदा ॥

श्रवणैकादश्यां वामनावतारः । भविष्योत्तरे -

निषिद्धमपि कर्त्तव्यं त्रयोदश्याञ्च पारणम् ।
द्वादश्याञ्च निराहारो वामनं पूजयाम्यहम् ॥
उदकुम्भे स्वर्णमयं त्रयोदश्याञ्च पारणम् ।
आवाहयाम्यहं विष्णुं वामनं शङ्खचक्रिणम् ॥

सितवस्त्रयुगच्छन्ने घटे सच्छत्रपादुके ।
स्नापयामि जलैः शुद्धैः विष्णुं पञ्चामृतादिभिः ॥
छत्रदण्डधरं विष्णुं वामनञ्च नमोनमः ।
अर्घ्यं ददामि देवेश अर्घ्यार्हाद्यैः सदार्चितः ॥
भक्तिमुक्तिप्रदो नित्यं सर्वैश्वर्ययुतं कुरु ।
वामनाय नमो गन्धो होमोऽन्नेनाष्टशतेन च ॥
ॐ नमो वासुदेवाय शिरः सम्पूजयेद्धरेः ।
श्रीधराय मुखं ह्येतत् कण्ठं कृष्णाय वै नमः ॥
नमः श्रीपतये वक्षो भुजौ सर्वास्त्रधारिणे ।
व्यापकाय नमो नाभिं वामनाय नमः कटिम् ॥
त्रैलोक्यजनकायेति मैत्रमङ्घ्री यजेद्धरेः ।
सर्वाधिपतये पादौ विष्णोः सर्वात्मने नमः ॥
धृतपक्वञ्च नैवेद्यं दद्याद्दध्योदनं घटम् ।
रात्रौ जागरणं कृत्वा प्रातः स्नात्वा च सङ्गमे ॥
गन्धपुष्पादिभिः पूजां दद्यात् पुष्पाञ्जलिं तथा ।
नमो नमस्ते गोविन्द बुधश्रवणसंज्ञित ॥
अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव ।
प्रीयतां देवदेवेशो मम नित्यं जनार्दनः ॥
वामनो बुद्धिदाता च द्रव्यस्थो वामनः स्वयम् ।
वामनः प्रतिगृह्णाति वामनो मे ददाति च ॥
द्रव्यस्थो वामनो नित्यं वामनाय नमो नमः ।
प्रदाय दक्षिणान् विप्रान् सम्भोज्यान्नं स्वयं चरेत् ॥

धूपदीपमन्त्रास्तु कूर्मपुराणादनुसरणीयाः । द्वादश्याञ्च निराहार इति सङ्कल्पवाक्यम् । चकाराद् द्वादश्यां निराहारो भवामि वेति समुच्चयार्थो न तु गृहीतैकादशीव्रतस्य एकादश्यामिन्द्रसूचकार्थः । एकादश्युपवासस्य श्रवणद्वादशी व्रताङ्गत्वाभावे सङ्कल्पवाक्ये तदुपादानस्यान्याय्यत्वात् । अत एव वह्निपुराणीय सङ्कल्पवाक्ये चकारो नास्त्येव । तद्यथा -

विधानं श्रृणु राजेन्द्र यथादिष्टं मनीषीभिः ।
यथोक्तं नियमं कुर्यादेकादश्यामुपोषितः ॥
दन्तकाष्ठं प्रगृह्यादौ वाग्यतो नियतेन्द्रियः ।
श्रवणद्वादशीयोगे समुपोष्य जनार्दनम् ॥
अर्चयित्वा विधानेन अहं भोक्ष्ये परेऽहनि ।
नदीनां सङ्गमे स्नायात् पूजयेत्तत्र वामनम् ॥
सौवर्णं रत्नसंयुक्तं द्वादशाङ्कुलमुच्छ्रितम् ॥
श्रवणद्वादशीयोगे तु, सङ्कल्पवाक्यम् -
श्रवणद्वादशी योगे सम्पूज्य गरुडध्वजम् ।
दत्वा दानं द्विजातिभ्यो वियोगे पारणं ततः ॥
वियोगे = श्रवणद्वादशी व्यपगमे ॥
अथ विष्णुश्रृङ्खला

**तत्र विष्णुधर्मोत्तरे-**

एकादशी द्वादशी च वैष्णव्यमपि तत्र चेत् ।
तद्विष्णुश्रृङ्खला नाम विष्णुसायुज्यकृत् भवेत् ॥
मत्स्यपुराणे -
द्वादशी श्रवणर्क्षञ्च स्पृशेदेकादशीं यदि ।

स एव वैष्णवो नित्यं विष्णुशृङ्खलसंज्ञकः ॥

तस्मादुपोष्य विधिवन्नरः प्रक्षीणकल्मषः ।

प्राप्नोत्यनत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम् ॥

रघुनाथवाजपेययाजिविरचिते कालतत्त्वविवेचने

श्रवणद्वादशीनिर्णयः

## अथ श्रवणद्वादश्यादिविवेचनम्

अथ श्रवणद्वादश्यास्तदितर महाद्वादशीनां च निर्णयः । तत्र द्वादश्या अल्पश्रवणयोगेऽपि श्रवणद्वादशीयोगप्रयुक्तमुपवासदि भवत्यैव । न तूपवासकर्मकालभूत-अहोरात्रोभयव्याप्तये तदुभयस्पर्शाय वौदयादुदयपर्यन्तत्व मस्तमयपर्यन्तत्वं वा तद्योगस्यापेक्षितम् ।

**तदुक्तं मत्स्यपुराणे -**

"द्वादशी श्रवणस्पृष्टा कृत्स्ना पुण्यतमा तिथिः ।

न तु सा तेन संयुक्ता तावत्यैव प्रशस्यते ॥ इति ॥

"यावती तेन संयुक्ता तावत्यैव प्रशस्यत" इति तावत्यां कर्तुं शक्यं यत्संगमस्नानपूजादानादि तदेव कुर्यान्न तूपवासादि, तद्धि च तद्योगकाल एव कुर्यान्न तु तत्पूर्वोत्तरकालयोरित्यपि नेत्यर्थः ।

श्रवणद्वादशीं प्रक्रम्य नारदीयेऽपि -

"तिथिनक्षत्रयोर्योगो योगश्चैव नराधिप ।

द्विकलो यदि लभ्येत स ज्ञेयो ह्यष्टयामिकः ॥ इति ॥

योगः शिवयोगादिः शिवचतुर्दश्यादेः पुण्यतमत्वप्रयोजकः ।

यत्तु व्यतीपातवैधृत्यादेर्योगस्य तावत्कालिकत्ववचनं तत्तन्मात्रप्रयुक्तदानादिविषयम् । "मुहूर्त्तमप्यहोरात्रे" इत्यादिवचनाद्

रोहिणीयोगोऽपि श्रवणयोगवदेव । तेन नक्षत्रयोगप्रयुक्तेतरमहाद्वादश्यादिपूपवासे उदयादुदय पर्यन्तोऽस्तमयपर्यन्तो वा नक्षत्रयोगोऽवश्यमपेक्षितः । "तिथिनक्षत्रयो" रिति वचनस्य बहुनिबन्धेषु श्रवणद्वादशीप्रकरणगतत्वाभिधानेन तन्मात्रविषयत्वात् ।

केचित्त्वस्य सामान्यवचनत्वमङ्गीकृत्य श्रवणरोहिणीयोगवदल्पैनापीतरनक्षत्रयोगेनापि सकलायास्तिथेः पुण्यत्वमिच्छन्ति । तत्र श्रवणरोहिणीविषयस्य पुनर्वचनस्य प्रयोजनं चिन्त्यम् ।

तत्र या तावदेकस्मिन्नेव दिने श्रवणयोगवती शुद्धा शुद्धाधिका वा विद्धा विद्धाधिका वा तस्यां सन्देह एव नास्ति । यदा विद्धाधिकाया दिनद्वयेऽपि श्रवणयोगस्तदैकादशीयुता ग्राह्या ।

"द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदा ।
स एव वैष्णवो योगो विष्णुश्रृङ्खलसंज्ञितः ॥
उपोष्य विधिवत्तत्र नरः संक्षीणकिल्बिषः ।
प्राप्नोत्यनत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम् ॥ इति ॥
मत्स्यपुराणवचनात् ।

तन्त्रेण च तदैकादशीद्वादशीप्रयुक्तमुपवासद्वयम् । तत्रैव यदा श्रवणमेकादशीं स्पृष्ट्वा द्वादशीं स्पृशति तदातिप्राशस्त्यमुक्तं नारदीये -

"संस्पृश्यैकादशीं राजन् द्वादशीं यदि संस्पृशेत् ।
श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति ॥ इति ॥

यदा तु शुद्धाधिकाया दिनद्वयेऽपि श्रवणयोग उत्तरदिन एव चोदयकालीनः सः, तदोत्तरा ग्राह्या । "उदयव्यापिनी ग्राह्या श्रवणद्वादशी व्रते" इति बृहन्नारदीयवचनात् । एतस्य च शुद्धाधिकाविषये सावकाशत्वान्न पूर्वविषये

प्रवृत्तिः । तेन विद्धाधिकायामुत्तरदिने उदयकालीनश्रवणयोगेऽपि पूर्वस्या एव ग्रहणम् । अत एवाविरोधाच्च शुद्धाधिका पूर्वदिनेऽप्युदयकालीनश्रवणयोगवती पूर्वैव । कृत्स्नकर्मकालव्यापित्वात् ।

यदा तु द्वादश्याः श्रवणयोग एव नास्ति । एकादश्येव तु तद्वती तदा तस्यामपि श्रवणद्वादशीप्रयुक्तं व्रतं कर्त्तव्यम् ।

**तदुक्तं नारदीये -**

"यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् ।
एकादशी तदुपोष्या पापघ्नी श्रवणान्विता ॥ इति ॥

विष्णुपुराणेऽपि -

"याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः ।
तास्वेव तद्व्रतं कुर्याच्छ्रवणद्वादशीं विना ॥ इति ॥

श्रवणद्वादशीव्रतं तु द्वादश्याः श्रवणयुक्ताया अलाभेऽप्येकादश्यामपि तादृश्यां कर्त्तव्यमित्यर्थः । यथा च "जया च विजया चैव जयन्ती पापनाशिनी" त्यभिधाय "पुष्यश्रवणपोष्याद्यरोहिणीसंयुतास्तथे" ति ब्रह्मवैवर्त्तक्रमेण तासां लक्षणाभिधानाच्छ्रवणयुक्ता द्वादशी विजयसंज्ञा । तथा तादृश्या अलाभे तादृश्यैकादश्यपि ।

"एकादशी यदा शुक्ला श्रवणेन समन्विता ।
विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा ॥

इति भविष्योत्तरात् । किन्तु तदा तदुक्तप्रकारविशेषेण पूजादि कर्त्तव्यम् । विद्धाधिक्येऽपि चोत्तरदिने श्रवणयोगाभावे तादृशी दशमीविद्धापि ग्राह्या ।

"दशम्यैकादशी यत्र सा नोपोप्या भवेत्तिथिः ।
श्रवणेन तु संयुक्ता सा शुभा सर्वकामदा ॥

इति वह्निपुराणात् । तदापि चैकादश्युपवासस्तेन सह तन्त्रमेव ।

यद्यपि च भविष्योत्तरे नारदीयविष्णुपुराणवच्छ्रवणयुक्तद्वादश्य लाभविषयत्वं तादृश्यैकादश्या न प्रतीयते । किन्तु तल्लाभेऽपि स्वतन्त्रमिदमप्येकं व्रतमिति मदनरत्नादावपि तथैवोक्तम् । पारणादिने च श्रवणापेक्षया द्वादश्याधिक्ये श्रवणमुल्लङ्घ्य द्वादशीमध्य एव पारणम्, न तु द्वादश्यन्तं प्रतीक्ष्य । द्वादश्यास्तत्रानुपोष्यत्वात् । द्वादश्यपेक्षया श्रवणाधिक्ये च उपोष्यं श्रवणमतिलक्ष्य त्रयोदश्यामपि पारणम् ।

"पारणं तिथिवृद्धौ तु द्वादश्यामुडुसंक्षयात् ।
उडुवृद्धौ त्रयोदश्यां तत्र दोषो न विद्यते ॥

इति वह्निपुराणवचनमिति च पारणनिर्णयः कृतः ।

तथापि नारदीयाद्यएकवाक्यतया तत्रापि तादृशद्वादश्यलाभविषयत्वमेव तादृशैकदश्या द्रष्टव्यम् ।लाघवात् ।पूजादिप्रकारभेदोपदेशस्तु जयन्तीवदुपपन्नः । पारणाविषयं वह्निपुराणं च विष्णुशृङ्खलविषयं शुद्धाधिकाविषयं वा भविष्यति ।

"एषा व्युष्टिः समाख्याता एकादश्या मया तव ।
पृथगेव समाख्याता द्वादशी श्रवणान्विता" ॥

इति भविष्योत्तरवचनं तु व्युष्टिग्रहणात्फलबेदाभिप्रायं न व्रतस्वरूपभेदाभिप्रायम् ।

यदा चैकादशीश्रवणद्वादश्युपवासौ दिनभेदेन प्राप्नुतस्तदा शक्तेन द्वयमपि कर्तव्यम् ।

**तदुक्तं भविष्योत्तरे -**

"एकादशीमुपोष्याथ द्वादशीमप्युपोषयेत् ।

न तत्र विधिलोपः स्यादुभयोर्दैवतं हरिः ॥ इति ॥

दृष्टान्तेन वाचनिक इव न्याय्येऽपि बाधे प्रत्यवायो नास्तीति ज्ञाप्यते । वाजपेयपर्यन्तं गमनं बहुदीक्षत्वात् ।

श्रवणद्वादशीनिमित्तोपवासपारणं तु पारणदिने उभयानुवृत्तावुभयान्त इति मुख्यः पक्षः । "तिथिरष्टगुणं हन्ती" त्यादिवचनात् । अन्यतरान्त इति गौणः । "सांयोगिके" इत्यनेनोक्तस्य तस्य कालस्यान्यत्रोभयान्ततुल्यत्वेऽपि, अत्र -

"याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः ।

ऋक्षान्ते पारणं कुर्याद्विना श्रवणरोहिणीम्" ॥

इति वचने श्रवणरोहिणीपर्युदासस्य श्रवणरोहिणीयोगनिमित्ते व्रते उभयान्तपक्षस्य मुख्यत्वद्योतनार्थत्वात् ।

न तु अत्र तिथ्यन्तोऽवश्यं प्रतीक्षणीयः । न तु नक्षत्रमात्रान्ते पारणम कर्त्तव्यमित्येतत्परमिदम् । "भान्ते कुर्यात्तिथेर्वापि" इत्यादिभिर्वचनैर्नक्षत्रान्तेऽपि जयन्तीपारणविधानात्तद्विरोधापत्तेः । रोहिण्यंशे तदद्योगावुक्तप्रयोजनार्थत्वस्यैवोचितत्वादित्यादि सर्वं जन्माष्टमीप्रकरण एवोक्तम् ।

मदनरत्नादौ तु "जयन्त्यां नक्षत्रमात्रान्ते पारणविधिवच्छ्रवणद्वादश्यां तदभावात्पर्युदासवशादत्र नक्षत्रमात्रान्ते पारणन भवत्येव । किन्तूभयान्ते तिथिमात्रान्ते वा" इत्युक्तम् ।

इयं च श्रवणद्वादशीबुधवासरयुक्तातिप्रशस्ता ।

"श्रवणद्वादशीयोगे बुधवारी यदा भवेत् ।

अत्यन्तमहती नाम द्वादशी सा प्रकीर्त्तिता ॥

इति विष्णुधर्मोत्तरवचनात् ।

भाद्रपदे सात्यन्तफलदा ।

तथा च स्कन्दपुराणे -

"मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता ।
महती द्वादशी ज्ञेया उपवासे महाफला ॥
बुधश्रवणसंयुक्ता सा चैव द्वादशी भवेत् ।
अत्यन्तमहती तस्यां दत्तं भवति चाक्षयम् ॥ इति ॥
अत्र सङ्गमस्नानादि कर्त्तव्यम् ।
"स्नानं जप्यं तथा दानं होमः श्राद्धं सुरार्चनम् ।
सर्वमक्षय्यफलदं तस्यां भृगुकुलोद्वह ॥
तस्मिन्दिने तु यः स्नातो यत्र क्वचन सङ्गमे ।
स गङ्गास्नानजं राम फलं प्राप्नोत्यसंशयम् ॥
श्रवणे सङ्गमाः सर्वे परव्युष्टिप्रदाः सदा ।
विशेषवाद्वदशीयुक्ते बुधयुक्ते विशेषतः ॥
इत्यादिविष्णुधर्मोत्तरेऽभिधानात् ।

इति रघुनाथवाजपेययाजिविरचिते कालतत्त्वविवेचने श्रवणद्वादशीनिर्णयः

# भगवन्तभास्करे श्रवणद्वादशीनिर्णयः

भाद्रशुक्लद्वादशी श्रवणद्वादशी । सा चैकादशीयुतैव, तदुक्तं मात्स्ये -

द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदि ।
स एव वैष्णवो योगो विष्णुशृङ्खलसंज्ञितः ॥
तस्मिन्नुपोष्या विधिवन्नरः संक्षीणकल्मषः ।
प्राप्नोत्यनत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम् ॥ इति ।
यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् ।

द्वादश्यां श्रवणाभावे तु नारदीये

एकादशी तदुपोष्या पापघ्नी श्रवणान्विता ॥ इति ।
द्वादश्यामेव श्रवणयोगे तु भविष्ये -
एकादशीमुपोष्याथ द्वादशीं समुपोषयेत् ।
न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिः ॥ इति ।

विधिलोप एकादशीपारणहानिकृतः ।

अशक्तौ तु मात्स्ये -

द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि ।
उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिम् ॥ इति ।

अत्र कृत्यमुक्तं भविष्योत्तरे -

मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता ।
सर्वकामप्रदा पुण्या उपवासे महाफला ॥
सङ्गमे सरितां स्नात्वा द्वादशीं समुपोषितः ।
सम्मितं समवाप्नोति द्वादशद्वादशीफलम् ॥

विष्णुधर्मोत्तरे-

या राम श्रवणोपैता द्वादशी महती तु सा ।
तस्यामुपोषितः स्नातः पूजयित्वा जनार्दनम् ॥
प्राप्नोत्ययत्नाद्धर्मज्ञ द्वादशद्वादशीफलम् ।
दध्योदनयुतं तस्यां जलपूर्णघटं द्विज ॥
वस्त्रसंवेष्टितं दत्त्वा छत्रोपानहमेव च ।
न दुर्गतिमवाप्नोति गतिमग्र्यां च विन्दति ।
अक्षय्यस्थानमाप्नोति नात्र कार्या विचारणा ॥ इति ।

**पारणं तु विशेषो नारदीये -**

तिथिनक्षत्रयोगे तु उपवासो यदा भवेत् ।
**पारणं तु न कर्त्तव्यं यावन्नैकस्य संक्षयः ॥ इति ।**

अत्र वरुणासङ्गमे स्नानमुक्तं वैष्णवे -

अतः परं तु संसेव्यं गङ्गावरुणसङ्गमम् ।
श्रवणद्वादशीयोगे बुधवारी यदा भवेत् ।
तदा तस्मिन्नरः स्नात्वा सन्निहित्यां फलं लभेत् ॥ इति ।

**इति भगवन्तभास्करे श्रवणद्वादशीनिर्णयः**

## भविष्योत्तरपुराणान्तर्गत-

# विजयश्रवणद्वादशीव्रतवर्णनम्

श्रीकृष्ण उवाच

द्वादश्यास्ते विधिः प्रोक्तः श्रावणे यो युधिष्ठिर ।
सर्वपापप्रशमनः सर्वसौख्यप्रदायकः ॥१ ॥
एकादशी यदा सा स्याच्छ्रवणेन समन्विता ।
विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा ॥ २ ॥
बलवानजितो दैत्यो बलिर्नामा महाबलः ।
तेन देवगणाः सर्वे त्याजिताः सुरमंदिरम् ।
ततो देवा महाविष्णुं गत्वा वचनमूचिरे ।
त्वं गतिः सर्वदेवानां शीघ्रं कष्टात्समुद्धर । ४ ।
जहि दैत्यं महाबाहो बलिं बलनिषूदन ।
श्रुत्वा विष्णुस्तदा वाक्यं देवानां करुणोदयम्
॥५ ॥
उवाच वाक्यं कालज्ञो देवानां हितकाम्यया ।
जाने वैरोचनिं दैत्यं बलिं त्रैलोक्यकण्टकम् ॥ ६ ॥
तपसा भावितात्मानं शान्तं दान्तं जितेन्द्रियम् ।
मद्भक्तं मद्गतप्राणं सत्यसन्धं महाबलम् ।
तपसोन्तः सुबहुना काले नास्य भविष्यति ॥ ७ ॥
यदा विनयसम्पन्नं ज्ञास्ये कालेन केनचित् ।
समाहृत्य प्रियं तस्य तदा दास्ये दिवौकसाम् ॥ ८ ॥

अदितिर्मां प्रपन्ना वै पुत्रार्थे पुत्रलोभिनी ।
तस्यामतिहितं देवाः करिष्ये नात्र संशयः ॥ ९ ॥
तद्देवानां हितं सर्वे चाहितं तु सुरद्विषाम् ।
तद्गच्छध्वं निरुद्विग्नाः कालः कश्चित्प्रतीक्ष्यताम् ॥१० ॥
एवमुक्ता गता देवाः कार्यं विष्णुरचिंतयत् ।
सा चिन्तयित्वा सुचिरं देव्या गर्भावतारणम् ।
अदितिर्वरयामास वांछितं मे भविष्यति ॥११ ॥
अथ काले बहुतिथे गते सा गर्भिणी ह्यभूत् ।
सुषुवे नवमे मासि पुत्रं सा वामनं हरिम् ॥ १२ ॥
ह्रस्वपादं ह्रस्वकायं महच्छिरसमर्भकम् ।
पाणिपादोदरकृशं स्वयं नारायणं हरिम् ॥१३ ॥
दृष्ट्वा तु वामनं जातं यदि सा वक्तुमुद्यता ।
निरुद्धवाक्या ह्यभवद्वक्तुं किंचिन्न पारितम् ॥ १४ ॥
एकादश्यां भाद्रपदे श्रवणेन नरोत्तम ।
संचचाल मही जाते वामने तु त्रिविक्रमे ॥१५ ॥
भयं बभूव दैत्यानां देवानां तोष आभवत् ।
जातकर्मादिकांस्तस्य संस्कारान्स्वयमेव हि ॥१६ ॥
चकार कश्यपो धीमान्प्रजापतिरनुद्यतः ।
आबद्धमेखलो दंडी धृत्वा यज्ञोपवीतकम् ॥१७ ॥
कुशस्वच्छोदकधरः कमंडलुविभूषितः ।
बलेर्बलवतो यज्ञं जगाम बहुविस्तरम् ॥१८ ॥
दृष्ट्वा बलिमथोवाच वामनोऽभ्येत्य तत्क्षणम् ।

अथ चाह यज्ञपते दीयतां मम मेदिनी ॥१९॥
पादत्रयप्रमाणेन पठनार्थे स्थितो ह्यसि ।
दत्तादत्ता तव मया बलिः प्राह द्विजोत्तमम् ॥ २०॥
ततो वर्द्धितुमारब्धो वामनोऽनंतविक्रमः ।
पादौ भूमौ प्रतिष्ठाप्य शिरसावृत्य रोदसी ॥२१॥
ताभ्यामिंद्रादिकाँल्लोकाँल्ललाटे ब्रह्मणः पदम् ।
न तृतीय पदं लेभे ततो नेदुर्दिवौकसः ॥२२॥
तद्दृष्ट्वा महदाश्चर्यं सिद्धा देवर्षयस्तथा ।
साधुसाध्विति देवेशं प्रशशंसुर्मुदान्विताः ॥ २३॥
ततो दैत्यगणान्सर्वाञ्जित्वा त्रिभुवनं वशी ।
बलिमाह ततो गच्छ सुतलं स्वबलानुगः ॥ २४॥
तत्र त्वमीप्सितान्भोगान्भुक्त्वा मद्बाहुपालितः ।
अस्येंद्रस्यावसाने तु त्वमेवेन्द्रो भविष्यसि ॥२५ ॥
एवमुक्तो बलिः प्रायान्नमस्कृत्य नरोत्तमम् ।
विसृज्येमं बलिं देवान्सकलान्स उवाच ह ॥२६॥
स्वानि धिष्ण्यानि गच्छध्वं तिष्ठध्वं विगत ज्वराः ।
देवेनोक्ता गता देवा हृष्टाः संपूज्य वामनम् ॥२७॥
देवः कृत्वा जगत्कार्यं तत्रैवांतर्द्धिमागमत् ।
एतत्सर्वं समभवदेकादश्यां नराधिप ॥
तेनेष्टा देवदेवस्य सर्वदा विजया तिथिः ॥२८॥
एषा वै फाल्गुने मासि पुष्येण सहिता नृप ।
विजया प्रोच्यते सद्भिः कोटिकोटिगुणोत्तरा ॥२९॥

एकादश्यां सोपवासो रात्रौ संपूजयेद्धरिम् ।
रौप्ये सौवर्णपात्रे वा दारुवंशमयेऽपि वा ॥३० ॥
कुंडिकां स्थापयेत्पार्श्वे छत्रं वै पादुके तथा ।
शुभां च वैष्णवीं यष्टिं तथा सूत्रकमडलू ॥३१ ॥
आच्छाद्य पात्रं वासोभिः फलैश्चापि सुशोभनैः ।
मार्गचार्मणगन्धैश्च भक्त्या वा मृगचर्मणा ॥३२ ॥
तिलाढकेन वित्ताढ्यः प्रस्थेन कुडवेन वा ।
व्रीहिभिर्वाथ गोधूमैः फलैः शुक्लतिलैर्भवेत् ॥३३ ॥
पुष्पैर्गंधैर्धूपदीपैः पक्वान्नै रर्चयेद्धरिम् ।
नानाविधैश्च नैवेद्यैर्भक्ष्यभोज्यैर्गुडौदनैः ॥ ३४ ॥
स्वस्ववित्तानुसारेण सहिरण्यं च कारयेत् ।
मंत्रैः शतगुणं चैव भक्त्या लक्ष गुणोत्तरम् ।
भक्तिमांश्च गुणोपेतं कोटिकोटिगुणोत्तरम् ॥३५ ॥
एभिर्मंत्रपदैस्तत्र पूजयेद्गरुडध्वजम् ।
उपहारैर्नरश्रेष्ठ शुचिर्भूत्वा समाहितः ॥३६ ॥
ॐ जलजोपमदेहाय जलजास्याय शंखिने ।
जलराशिस्वरूपाय नमस्ते पुरुषोत्तम ॥ ३७ ॥
नमः कमलनाभाय नमस्ते जल शायिने ।
नमस्ते केशवानंत वासुदेव नमोऽस्तु ते ॥ ३८ ॥

इति स्नानमंत्रः

मलयेषु समुत्पन्नं गन्धाढयं सुमनोहरम् ।
मया निवेदितं तुभ्यं गृहाण परमेश्वर ॥ ३९ ॥

इति चन्दनमंत्रः ।

वनस्पतिसमुत्पन्नं गन्धाढ्यं सुमनोहरम् ।
मया निवेदितं पुष्पं गृहाण पुरुषोत्तम ॥ ४० ॥

इति पुष्पमन्त्रः

नमः कमलकिंजल्कपीतनिर्मलवाससे ।
मनोहरवपुःस्कन्धधृतचक्राय शार्ङ्गिणे ॥ ४१ ॥

इति पूजामंत्रः

मत्स्यः कूर्मो वरा हश्च नारसिंहश्च वामनः ।
रामो रामश्च कृष्णश्च नामभिर्वामनाय ते ।
पादाद्यैकैकांगस्य पूजनं शीर्षगं ततः ॥ ४२ ॥

इति सर्वांगपूजा

धूपोऽयं देवदेवेश शंखचक्रगदाधर ।
अच्युतानंत गोविन्द वासुदेव नमोऽस्तु ते ॥४३ ॥

इति धूपमंत्रः

त्वमेव पृथिवी ज्योतिर्वायुराकाशमेव च ।
त्वमेव ज्योतिषां ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥ ४४ ॥

इति दीपमंत्रः

अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ।
भक्ष्यभोज्यसमायुक्तं प्रसीद परमेश्वर ॥४५ ॥
अन्नं प्रजापतिर्विष्णू रुद्रेंद्रशशिभास्कराः ।
अन्नं त्वष्टा यमोऽग्निश्च पापं हरतु मेऽव्ययः ॥४६ ॥

इति नैवेद्यमंत्रः

जगदादिर्जगद्रूपमनादिर्जगदंतकृत् ।
जलाशयो जगद्योनिः प्रीयतां मे जनार्दनः ॥४७॥

इति प्रीणनमंत्रः

अनेककर्मनिर्बंधध्वंसिनं जल शायिनम्।
नतोऽस्मि मथुरावासं माधवं मधुसूदनम् ॥४८॥
नमो वामनरूपाय नमस्तेऽस्तु त्रिविक्रम ।
नमस्ते मणिबन्धाय वासुदेव नमोऽस्तु ते ॥४९॥
इति नमस्कारमंत्रः ।
नमो नमस्ते गोविन्द वामनेश त्रिविक्रम ॥५०॥
अघौघसंक्षयं कृत्वा सर्वकामप्रदो भव ॥५१॥

इति प्रार्थनामंत्रः

सर्वगः सर्वदेवेशः श्रीधरः श्रीनिकेतनः ।
विश्वेश्वरश्च विष्णुश्च श्रीशायी च नमोनमः ॥५२॥

इति शयनमंत्रः

एवं संपूज्य यो रात्रावेकादश्यां नृपोत्तम ।
जागरं तत्र कुर्वीत गीतवादित्रनिस्वनैः ॥५३॥
या च श्रवणसंयुक्ता द्वादशी परमा तिथिः ।
तस्यां च संगमे स्नात्वा सर्वपापैः प्रमुच्यते ॥५४॥
एवं संपूज्य यत्नेन प्रभाते विमले सति ।
प्रदेयं शास्त्रविदुषे ब्राह्मणाय च मंत्रतः ॥५५॥
ब्राह्मणश्चापि मन्त्रेण प्रतिगृह्णीत मंत्रवत् ।
वामनोऽस्य प्रतिग्राही वामनाय नमोनमः ॥५६॥

( ॐ गुह्ये । ॐ शिरसि । ॐ पादयोः । ॐ नाभौ । ॐ भुजयोः । ॐ सर्वांगे । सर्वात्मने नमः ।)

पुष्पं फलं च नैवेद्यं सर्वमेतद्यथाविधि ।
नरो दद्यादुपोष्यैवमेकादश्यां समंत्रकम् ॥५७ ॥
पूर्वोक्तविधिना प्रातर्भोजनं पृषदाज्यकम् ।
पूर्वं दत्त्वा ब्राह्मणेभ्यः पश्चाद्भुञ्जीत वाग्यतः ॥५८ ॥
भूयोभूयोऽपि राजेंद्र सर्वत्रैवं विधिः स्मृतः ।
समाप्ते तु व्रते राजन्यत्पुण्यं तन्निबोध मे ॥५९ ॥
चतुर्युगानि राजेंद्र एकसप्ततिसंख्यया ।
प्राप्य विष्णुपुरे राजन्क्रीडते कालमक्षयम् ॥ ६० ॥
इहागत्य भवेद्राजा प्रतिपक्षक्षयंकरः ।
हस्त्यश्वरथपत्तीनां दाता भोक्ता विमत्सरी ॥६१ ॥
रूपसौभाग्यसंपन्नो दीर्घायुर्नीरुजो भवेत् ।
पुत्रैः परिवृतो जीवो जीवेच्च शरदः शतम् ॥६२ ॥
एतस्याः फलमाख्यातमेकादश्या मया तव ।
पूर्वमेव समाख्याता द्वादशी श्रवणान्विता ॥६३ ॥
उपोष्यैकादशीं पश्चाद्द्वादशीमप्युपोषयेत् ।
न चात्र विधिलोपः स्यादुभयोर्देवता हरिः ॥ ६४ ॥

(एकादशीद्वादश्योरन्यतरस्यां श्रवणयुक्तायां श्रवणयुक्तोपवासेनैव व्रतद्वयसिद्धिः । एकस्मिन्व्रते पूर्वमन्यां तिथिमुपोष्य पश्चादपारयित्वैवान्योपोष्यत इति यो विधिलोपः स एकदेवताकत्वेन न भवतीत्यर्थः) ।

बुधश्रवणसंयुक्ता द्वादशी संगमोदकम् ।

दानं दध्योदनं सत्यमुपवासः परो विधिः ॥६ ५ ॥

सगरेण ककुत्स्थेन धुंधुमारेण गाधिना ।

एतैश्चान्यैश्च राजेंद्र कृतं वै द्वादशीव्रतम् ॥६६ ॥

सा द्वादशी बुधयुता श्रवणेन साकं

स्याद्वै जयाय कथिता ऋषिभिर्नभस्ये ।

तामादरेण समुपोष्य नरोऽमरत्वं

प्राप्नोति पार्थ अणिमादिगुणोपपन्नम् ॥६७ ॥

इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे विजयश्रवणद्वादशीव्रतवर्णनं नाम षट्सप्ततितमोऽध्यायः

## वामनपुराणान्तर्गतम्

# श्रवणद्वादशीमाहात्म्यम्

**पुलस्त्य उवाच**

कालिन्दीसलिले स्नात्वा पूजयित्वा त्रिविक्रमम् ।

उपोष्य रजनीमेकां लिङ्गभेदं गिरिं ययौ ॥ १ ॥

तत्र स्नात्वा च विमले भवं दृष्ट्वा च भक्तितः ।

उपोष्य रजनीमेकां तीर्थं केदारमाव्रजत् ॥ २ ॥

तत्र स्नात्वाऽर्च्य चेशानं माधवं चाप्यभेदतः ।

उषित्वा वासरान् सप्त कुब्जाभ्रं प्रजगाम ह ॥ ३ ॥

ततः सुतीर्थे स्नात्वा च सोपवासी जितेन्द्रियः.

हृषीकेशं समभ्यर्च्य ययौ बदरिकाश्रमम् ॥ ४ ॥

तत्रोष्य नारायणमर्च्य भक्त्या स्नात्वाऽथ विद्वान् स सरस्वतीजले ।

वराहतीर्थे गरुडासनं स दृष्ट्वाऽथ संपूज्य सुभक्तिमांश्च ॥ ५

भद्रकर्णे ततो गत्वा जयेशं शशिशेखरम् ।
दृष्ट्वा संपूज्य च शिवं विपाशामभितो ययौ ॥ ६ ॥
तस्यां स्नात्वा समभ्यर्च्य देवदेवं द्विजप्रियम् ।
उपवासी इरावत्यां ददर्श परमेश्वरम् ॥ ७ ॥
यमाराध्य द्विजश्रेष्ठ शाकले वै पुरूरवाः ।
समवाप परं रूपमैश्वर्य च सुदुर्लभम् ॥ ८ ॥
कुष्ठरोगाभिभूतश्च यं समाराध्य वै भृगुः ।
आरोग्यमतुलं प्राप संतानमपि चाक्षयम् ॥ ९ ॥

नारद उवाच

कथं पुरूरवा विष्णुमाराध्य द्विजसत्तम ।
विरूपत्वं समुत्सृज्य रूपं प्राप श्रिया सह ॥ १० ॥

पुलस्त्य उवाच

श्रूयतां कथयिष्यामि कथां पापप्रणाशिनीम् ।
पूर्वं त्रेतायुगस्यादौ यथावृत्तं तपोधन ॥ ११ ॥
मद्रदेश इति ख्यातो देशो वै ब्रह्मणः सुत ।
शाकलं नाम नगरं ख्यातं स्थानीयमुत्तमम् ॥ १२ ॥
तस्मिन् विपणिवृत्तिस्थः सुधर्माख्योऽभवद् वणिक् ।
धनाढ्यो गुणवान् भोगी नानाशास्त्रविशारदः ॥ १३ ॥
स त्वेकदा निजाद् राष्ट्रात् सुराष्ट्रं गन्तुमद्यतः ।
सार्थेन महता युक्तो नानाविपणपण्यवान् ॥ १४ ॥
गच्छतः पथि तस्याथ मरुभूमौ कलिप्रिय ।

अभवद् दस्युतो रात्रौ अवस्कन्दोऽतिदुःसहः ॥ १५ ॥
ततः स हृतसर्वस्वो वणिग् दुःखसमन्वितः ।
असहायो मरौ तस्मिंश्चचारोन्मत्तवद् वशी ॥ १६ ॥
चरता तदरण्यं वै दुःखाक्रान्तेन नारद ।
आत्मा इव शमीवृक्षो मरावासादितः शुभः ॥ १७ ॥
तं मृगैः पक्षिभिश्चैव हीनं दृष्ट्वा शमीतरुम् ।
श्रान्तः क्षुत्तृड्दरीतात्मा तस्याधः समुपाविशत् ॥ १८ ॥
सुप्तश्चापि सुविश्रान्तो मध्याह्ने पुनरुत्थितः ।
समपश्यदथायान्तं प्रेतं प्रेतशतैर्वृतम् ॥ १९ ॥
उह्वाह्यन्तमथान्येन प्रेतेन प्रेतनायकम् ।
पिण्डाशिभिश्च पुरतो धावद्भी रूक्षविग्रहैः ॥ २० ॥
अथाजगाम प्रेतोऽसौ पर्यटित्वा वनानि च ।
उपागम्य शमीमूले वणिक्पुत्रं ददर्श सः ॥ २१ ॥
स्वागतेनाभिवाद्यैनं समाभाष्य परस्परम् ।
सुखोपविष्टश्छायायां पृष्ट्वा कुशलमाप्तवान् ॥ २२ ॥
ततः प्रेताधिपतिना पृष्टः स तु वणिक्सखः ।
कुत आगम्यते ब्रूहि क्व साधो वा गमिष्यसि ॥ २३ ॥
कथं चेदं महारण्यं मृगपक्षिविवर्जितम् ।
समापन्नोऽसि भद्रं ते सर्वमाख्यातुमर्हसि ॥ २४ ॥
एवं प्रेताधिपतिना वणिक् पृष्टः समासतः ।
सर्वमाख्यातवान् ब्रह्मन् स्वदेशधनविच्युतिम् ॥ २५ ॥
तस्य श्रुत्वा स वृत्तान्तं तस्य दुःखेन दुःखितः ।

वणिक्पुत्रं ततः प्राह प्रेतपालः स्वबन्धुवत् ॥ २६ ॥
एवं गतेऽपि मा शोकं कर्तुमर्हसि सुव्रत ।
भूयोऽप्यर्थाः भविष्यन्ति यदि भाग्यबलं तव ॥ २७ ॥
भाग्यक्षयेऽर्थाः क्षीयन्ते भवन्त्यभ्युदये पुनः ।
क्षीणस्यास्य शरीरस्य चिन्तया नोदयो भवेत् ॥ २८ ॥
इत्युच्चार्य समाहूय स्वान् भृत्यान् वाक्यमब्रवीत् ।
अद्यातिथिरयं पूज्यः सदैव स्वजनो मम ॥ २९ ॥
अस्मिन् समागते प्रेताः प्रीतिर्जाता ममातुला ॥ ३० ॥
एवं हि वदतस्तस्य मृत्पात्रं सुदृढं नवम् ।
दध्योदनेन संपूर्णमाजगाम यथेप्सितम् ॥ ३१ ॥
तथा न वा च सुदृढा संपूर्णा परमाम्भसा ।
वारिधानी च संप्राप्ता प्रेतानामग्रतः स्थिता ॥ ३२ ॥
तमागतं ससलिलमन्नं वीक्ष्य महामतिः ।
प्राहोत्तिष्ठ वणिक्पुत्र त्वमाह्निकमुपाचर ॥ ३३ ॥
ततस्तु वारिधान्यास्तौ सलिलेन विधानतः ।
कृताह्निकावुभौ जातौ वणिक् प्रेतपतिस्तथा ॥ ३४ ॥
ततो वणिक्सुतायादौ दध्योदनमथेच्छया ।
दत्त्वा तेभ्यश्च सर्वेभ्यः प्रेतेभ्यो व्यददात् ततः ॥ ३५ ॥
भुक्तवत्सु च सर्वेषु कामतोऽम्भसि सेविते ।
अनन्तरं स बुभुजे प्रेतपालो वराशनम् ॥ ३६ ॥
प्रकामतृप्ते प्रेते च वारिधान्योदनं तथा ।
अन्तर्धानमगाद् ब्रह्मन् वणिक्पुत्रस्य पश्यतः ॥ ३७ ॥

ततस्तदद्भुततमं दृष्ट्वा स मतिमान् वणिक् ।
पप्रच्छ तं प्रेतपालं कौतूहलमना वशी ॥ ३८ ॥
अरण्ये निर्जने साधो कुतोऽन्नस्य समुद्भवः ।
कुतश्च वारिधानीयं संपूर्णा परमाम्भसा ॥ ३९ ॥
तथामी तव ये भृत्यास्त्वत्तस्ते वर्णतः कृशाः ।
भवानपि च तेजस्वी किंचित्पुष्टवपुः शुभः ॥ ४० ॥
शुक्लवस्त्रपरीधानो बहूनां परिपालकः ।
सर्वमेतन्ममाचक्ष्व को भवान् का शमी त्वियम् ॥ ४१ ॥
इत्थं वणिक्सुतवचः श्रुत्वाऽसौ प्रेतनायकः ।
शशंस सर्वमस्याद्यं यथावृत्तं पुरातनम् ॥ ४२ ॥
अहमासं पुरा विप्रः शाकले नगरोत्तमे ।
सोमशर्मेति विख्यातो बहुलागर्भसंभवः ॥ ४३ ॥
ममास्ति च वणिक् श्रीमान् प्रातिवेश्यो महाधनः ।
स तु सोमश्रवा नाम विष्णुभक्तो महायशाः ॥ ४४ ॥
सोऽहं कदर्यो मूढात्मा धनेऽपि सति दुर्मतिः ।
न ददामि द्विजातिभ्यो न चाश्नाम्यन्नमुत्तमम् ॥ ४५ ॥
प्रमादाद् यदि भुञ्जामि दधिक्षीरघृतान्वितम् ।
ततो रात्रौ नृभिर् घोरैस्ताड्यते मम विग्रहः ॥ ४६ ॥
प्रातर्भवति मे घोरा मृत्युतुल्या विषूचिका ।
न च कश्चिन्ममाभ्यासे तत्र तिष्ठति बान्धवः ॥ ४७ ॥
कथं कथमपि प्राणा मया संप्रतिधारिताः ।
एवमेतादृशः पापी निवसाम्यतिनिर्घृणः ॥ ४८ ॥

सौवीरतिलपिण्याकसक्तुशाकादिभोजनैः ।
क्षपयामि कदन्नाद्यैरात्मानं कालयापनैः ॥ ४९ ॥
एवं तत्रासतो मह्यं महान् कालोऽभ्यगादथ ।
श्रवणद्वादशी नाम मासि भाद्रपदेऽभवत् ॥ ५० ॥
ततो नागरिको लोको गतः स्नातुं हि संगमम् ।
इरावत्या नड्वलाया ब्रह्मक्षत्रपुरस्सरः ॥ ५१ ॥
प्रातिवेश्यप्रसंगेन तत्राप्यनुगतोऽस्म्यहम् ।
कृतोपवासः शुचिमानेकादश्यां यतव्रतः ॥ ५२ ॥
ततः संगमतोयेन वारिधानीं दृढां नवाम् ।
संपूर्णां वस्तुसंवीतां छत्रोपानहसंयुताम् ॥
मृत्पात्रमपि मिष्टस्य पूर्णं दध्योदनस्य ह ।
प्रदत्तं ब्राह्मणेन्द्राय शुचये ज्ञानधर्मिणे ॥ ५४ ॥
तदेव जीवता दत्तं मया दानं वणिक्सुत ।
वर्षाणां सप्ततीनां वै नान्यद् दत्तं हि किंचन ॥ ५५ ॥
मृतः प्रेतत्वमापन्नो दत्त्वा प्रेतान्नमेव हि ।
अमी चादत्तदानास्तु मदन्नेनोपजीविनः ॥ ५६ ॥
एतत्ते कारणं प्रोक्तं यत्तदन्नं मयाम्भसा ।
दत्तं तदिदमायाति मध्याह्नेऽपि दिने दिने ॥ ५७ ॥
यावन्नाहं च भुञ्जामि न तावत् क्षयमेति वै ।
मयि भुक्ते च पीते च सर्वमन्तर्हितं भवेत् ॥ ५८ ॥
यच्चातपत्रमददं सोऽयं जातः शमीतरुः ।
उपानद्युगले दत्ते प्रेतो मे वाहनोऽभवत् ॥ ५९ ॥

इयं तवोक्ता धर्मज्ञ मया कीनाशतात्मनः।
श्रवणद्वादशीपुण्यं तवोक्तं पुणयवर्धनम् ॥ ६० ॥
इत्येवमुक्ते वचने वणिक्पुत्रोऽब्रवीद् वचः।
यन्मया तात कर्त्तव्यं तदनुज्ञातुमर्हसि ॥ ६१ ॥
तत् तस्य वचनं श्रुत्वा वणिक्पुत्रस्य नारद।
प्रेतपालो वचः प्राह स्वार्थसिद्धिकरं ततः ॥ ६२ ॥
यत् त्वया तात कर्त्तव्यं मद्धितार्थं महामते।
कथयिष्यामि तत् सम्यक् तव श्रेयस्करं मम ॥ ६३ ॥
गयायां तीर्थजुष्टायां स्नात्वा शौचसमन्वितः।
मम नाम समुद्दिश्य पिण्डनिर्वपणं कुरु ॥ ६४ ॥
तत्र पिण्डप्रदानेन प्रेतभावादहं सखे।
मुक्तस्तु सर्वदातॄणां यास्यामि सहलोकताम् ॥ ६५ ॥
यथेयं द्वादशी पुण्या मासि प्रौष्ठपदे सिता।
बुधश्रवणसंयुक्ता साऽतिश्रेयस्करी स्मृता ॥ ६६ ॥
इत्येवमुक्त्वा वणिजं प्रेतराजोऽनुगैः सह।
स्वनामानि यथान्यायं सम्यगाख्यातवाञ्छुचिः ॥ ६७ ॥
प्रेतस्कन्धे समारोप्य त्याजितो मरुमण्डलम्।
रम्येऽथ शूरसेनाख्ये देशे प्राप्तः स वै वणिक् ॥ ६८ ॥
स्वकर्मधर्मयोगेन धनमुच्चावचं बहु।
उपार्जयित्वा प्रययौ गयाशीर्षमनुत्तमम् ॥ ६९ ॥
पिण्डनिर्वपणं तत्र प्रेतानामनुपूर्वशः।
चकार स्वपितॄणां च दायादानामनन्तरम् ॥ ७० ॥

आत्मनश्च महाबुद्धिर्महाबोध्यं तिलैर्विना ।
पिण्डनिर्वपणं चक्रे तथान्यानपि गोत्रजान् ॥ ७१ ॥
एवं प्रदत्तेष्वथ वै पिण्डेषु प्रेतभावतः ।
विमुक्तास्ते द्विज प्रेता ब्रह्मलोकं ततो गताः ॥ ७२ ॥
स चापि हि वणिक्पुत्रो निजमालयमाव्रजत् ।
श्रवणद्वादशीं कृत्वा कालधर्ममुपेयिवान् ॥ ७३ ॥
गन्धर्वलोके सुचिरं भोगान् भुक्त्वा सुदुर्लभान् ।
मानुष्यं जन्ममासाद्य स बभौ शाकले विराट् ॥ ७४ ॥
स्वधर्मकर्मवृत्तिस्थः श्रवणद्वादशीरतः ।
कालधर्ममवाप्यासौ गुह्यकावासमाश्रयत् ॥ ७५ ॥
तत्रोष्य सुचिरं कालं भोगान् भुक्त्वाऽथ कामतः ।
मर्त्यलोकमनुप्राप्य राजन्यतनयोऽभवत् ॥ ७६ ॥
तत्रापि क्षत्रवृत्तिस्थो दानभोगरतो वशी ।
गोग्रहेऽरिगणाञ्जित्वा कालधर्ममुपेयिवान् ।
शक्रलोकं स संप्राप्य देवैः सर्वैः सुपूजितः ॥ ७७ ॥
पुण्यक्षयात् परिभ्रष्टः शाकले सोऽभवद् द्विजः ।
ततो विकटरूपोऽसौ सर्वशास्त्रार्थपारगः ॥ ७८ ॥
विवाहयद् द्विजसुतां रूपेणानुपमां द्विज ।
सावमेने च भर्त्तारं सुशीलमपि भामिनी ॥ ७९ ॥
विरूपमिति मन्वाना ततस्सोभूत् सुदुःखितः ।
ततो निर्वेदसंयुक्तो गत्वाश्रमपदं महत् ॥ ८० ॥
इरावत्यास्तटे श्रीमान् रूपधारिणमासदत् ।

तमाराध्य जगन्नाथं नक्षत्रपुरुषेण हि ॥ ८१ ॥

सुरूपतामवाप्याग्र्यां तस्मिन्नेव च जन्मनि।

ततः प्रियोऽभूद् भार्याया भोगवांश्चाभवद् वशी।

श्रवणद्वादशीभक्तः पूर्वाभ्यासादजायत ॥ ८२ ॥

एवं पुराऽसौ द्विजपुंगवस्तु कुरूपरूपो भगवत्प्रसादात्।

अनङ्गरूपप्रतिमो बभूव मृतश्च राजा स पुरूरवाऽभूत् ॥ ८३ ॥

इति श्रीवामनपुराणे त्रिपञ्चाशोऽध्यायः ॥ ७९ ॥

## विष्णुधर्मोत्तरपुराणान्तर्गतं ०६०

# श्रवणद्वादशीव्रतविधानम्

राम उवाच

उपवासासमर्थानां किं स्यादेकमुपोषितम् ।

महाफलं महादेव तत्समाचक्ष्व पृच्छतः ।१ ॥

शङ्कर उवाच

या राम श्रवणोपेता द्वादशी महती च सा ।

तस्यामुपोषितः स्नातः पूजयित्वा जनार्दनम् ॥ २ ।

प्राप्नोत्ययत्नाद्धर्मज्ञ द्वादशद्वादशीफलम् ।

दध्योदनयुतं तस्यां जलपूर्णं घटं द्विजे ॥ ३ ॥

वस्त्रसंवेष्टितं दत्त्वा छत्रोपानहमेव च ।

न दुर्गतिमवाप्नोति गतिमन्याञ्च विन्दति ॥ ४ ॥

अक्षय्यं स्थानमाप्नोति नाऽत्र कार्या विचारणा ।

श्रवणद्वादशीयोगे बुधवारो भवेद्यदि ॥ ५ ॥
अत्यन्तं महती नाम द्वादशी सा प्रकीर्तिता ।
स्नानं जप्यं तथा दानं होमं श्राद्धं सुरार्चनम् ॥ ६ ॥
सर्वमक्षय्यमाप्नोति तस्य भृगुकुलोद्वह ।
तस्मिन्दिने तथा स्नातो यत्र क्वचन संगमे ॥ ७ ॥
स क्रतुस्नानजं पुण्यं फलमाप्नोत्यसंशयम् ।
श्रवणे संगमाः सर्वे फलपुष्टिप्रदाः सदा ॥ ८ ॥
विशेषाद्वादशीयुक्ते बुधयुक्ते विशेषतः ।
यथैव द्वादशी प्रोक्ता बुधश्रवणसंयुता ॥ ९ ॥
तृतीया च तथा ज्ञेया सर्वकामसमन्विता ।
यथा तृतीया धर्मज्ञ तथा पञ्चदशी शुभा ॥ १० ॥
त्र्यहःस्पृशेऽपि दिवसे चोपवासे महाफलः ।
केशवाभ्यर्चने राम दानजप्यादिकेषु च ॥ ११ ॥
इति विष्णुधर्मोत्तरपुराणान्तर्गतश्रवणद्वादशीव्रतविधानम्

## विष्णुधर्मोत्तरपुराणान्तर्गतं

# श्रवणद्वादशी-दीपदानमाहात्म्यम्

श्रवणद्वादशीयोगे कृष्णपक्षे तथैव च ।
घृतेन दीपा दातव्यास्तिलैर्वा यदुनन्दन ॥३० ॥
वसामज्जादिभिर्देया न तु दीपाः कथञ्चन ।
दत्त्वा दीपं न कर्तव्यं तेन कर्म विजानता ॥३१ ॥
निर्वापणं च दीपस्य हिंसनं च विगर्हितम् ।

यः कुर्यात्तेन कर्माणि स्यादसौ पुष्पितेक्षणः ॥ ३२ ॥
दीपहर्ता भवेदन्धः काणो निर्वापको भवेत् ।
दीपदानात्परं दानं न भूतं न भविष्यति ॥ ३३ ॥
दीपदानं तु कर्तव्यं विप्रवेश्मसु पण्डितैः ।
द्विजवेश्मनि यो दद्यात्कार्तिके मासि दीपकम् ॥ ३४ ॥
अग्निष्टोमफलं तस्य प्रवदन्ति मनीषिणः ।
प्राणिजां नीलरक्तां च दीपे वर्तिं विवर्जयेत् ॥ ३५ ॥
विशेषेण प्रदातव्या पद्मसूत्रभवा नृप ।
पद्मसूत्रोद्भवां वर्तिं गन्धतैलेन दीपके ॥ ३६ ॥
विरोगः सुभगश्चैव दत्त्वा भवति मानवः ।
दातव्यं देवदेवस्य कर्पूरेण च दीपकम् ॥
अश्वमेधमवाप्नोति कुलं चैव समुद्धरेत् ॥ ३७ ॥
एतन्मयोक्तं तव दीपदाने फलं समग्रं यदुवंशचन्द्र ।
श्रुत्वा यथावत्सततं तु देया दीपास्त्वया विप्रसुरालयेषु ॥३८ ॥

इति श्रीविष्णुधर्मोत्तरे प्रथमखण्डे मार्कण्डेयवज्रसंवादे दीपदानप्रशंसा नाम षट्द्वष्ट्यधिकशततमोऽध्यायः ॥

## विष्णुधर्मोत्तरान्तर्गतं

# श्रवणद्वादशीप्रशंसावर्णनम्

**वज्र उवाच**

उपवासासमर्थानां शुक्लपक्षे द्विजोत्तम ।
एका या द्वादशी पुण्या तां वदस्व ममानघ ॥ १ ॥

मार्कण्डेय उवाच

मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता॥
महती द्वादशी ज्ञेया उपवासे महाफला ॥ २ ॥
सङ्गमे सरितोः पुण्ये द्वादशीं तामुपोषितः ।
अयत्नादेवमाप्नोति द्वादशद्वादशीफलम् ॥ ३ ॥
बुधश्रवणसंयुक्ता सैव चेद्द्वादशी भवेत् ।
अत्यन्तमहती यस्यां सर्वं कृतमथाक्षयम् ॥ ४ ॥
द्वादशी श्रवणोपेता यदा भवति पार्थिव॥
सङ्गमे तु तदा स्नात्वा सत्तीर्थस्नानजं फलम् ॥ ५ ॥
सोपवासः समाप्नोति नात्र कार्या विचारणा ।
वारिधानीं तदा दत्त्वा जलपूर्णां द्विजातये ॥ ६ ॥
छन्नां वस्त्रयुतां राजञ्छत्रोपानहसंयुताम् ।
स्वर्गलोकमवाप्नोति कुलमुद्धरति स्वकम् ॥ ७ ॥
स्वर्गं समासाद्य चिरं च भोगान्भुक्त्वा महेन्द्रोपम देवतुल्यान् ।
मानुष्यमासाद्य भवत्यरोगो धनान्वितो धर्मपरो मनस्वी ॥ ८ ॥

इति श्रीविष्णुधर्मोत्तरेप्रथमखण्डे मार्कण्डेयवज्रसंवादे
श्रवणाद्वादशीप्रशंसावर्णनं नामैकषष्ट्यधिकशततमोऽध्यायः

मार्कण्डेय उवाच

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
महत्यरण्ये यद्वृत्तं भूमिपाल पुरातनम् ॥ १ ॥
देशा दाशेरका नाम तेषां भागे तु पश्चिमे ।
अस्ति राजन्मरुर्देशः सर्वसत्त्वभयङ्करः ॥ २ ॥

सुतप्तसिकता भूमिर्यत्र दुष्ट महोरगा ।
स्वल्पच्छायासमाकीर्णा मृतप्राणिसमाकुला ॥ ३ ॥
शमीखदिरफुल्लासकरीराः पैलुभिः सह ।
तत्र भीमा द्रुमगणाः कण्टकैरावृताः समम् ॥ ४ ॥
चण्डप्राणिगणाकीर्णा तत्र भूमिस्तथा क्वचित् ।
अत्यन्ततापविषमा निस्तृणा परुषोपला ॥ ५ ॥
नाश्रयस्तत्र नाहारो ज्वलिताग्निसमे भृशम् ।
तथापि तत्र जीवन्ति जनाः कर्मनिबन्धनात् ॥६ ॥
नोदकं नोदकधरा राजंस्तत्र बलाहकाः ।
कदाचिदपि दृश्यन्ते देशे निरयसन्निभे ॥ ७ ॥
तत्र पक्षान्तरगतैस्तृषितैः शिशुभिः सह ।
उत्क्रान्तजीविता राजन्दृश्यन्तेऽथ विहङ्गमाः ॥ ८ ॥
उत्प्लुत्योत्प्लुत्य सहसा मृगाः सैकतमालयात ।
सैकतेष्वेव नश्यन्ति जले सैकतसेतुवत् ॥ ९ ॥
तस्मिंस्तथाविधे देशे कश्चिदैववशाद्वणिक् ।
वनमातपविभ्रष्टः प्रविष्टस्तु परिभ्रमन् ॥ १० ॥
स तत्र ददृशे प्रेतान्क्षुत्तृष्णाव्याकुलेन्द्रियान् ।
उत्कचान्मलिनान्रूक्षान्निर्मांसान्भीमदर्शनान् ॥ ११ ॥
स्नायुबद्धस्थिराकायान्धावमानानितस्ततः ।
कश्चित्समांसं तत्रैकं प्रेतस्कन्धगतं तदा ॥ १२ ॥
ददर्श बहुभिः प्रेतैः समन्तात्परिवारितम् ।
तत्स्कन्धादपरं स्कंधं नीयमानं क्रमात्क्रमात् ॥ १३ ॥

प्रेतोऽपि दृष्ट्वा तां घोरामटवीं नरमागतम् ।
प्रेतस्कन्धान्महीं गत्वा तस्यान्तिकमुपागमत् ॥ १४ ॥
सोऽभिवाद्य वणिकच्छ्रेष्ठमिदं वचनमब्रवीत् ।
अस्मिन्घोरे महारण्ये प्रवेशो भवतः कथम् ॥ १५ ॥
तमुवाच वणिग्धीमान्सार्थभ्रष्टस्य मे वने ।
प्रवेशो दैवयोगेन पूर्वकर्मकृतेन तु ॥ १६ ॥
तृष्णा मे बाधतेऽत्यर्थं क्षुत्क्षामश्च भृशं तथा ।
प्राणाः कण्ठमनुप्राप्ता वदनं भ्रश्यते च मे ॥१७ ॥
अत्रोपायं न पश्यामि ध्रियेऽहं येन केन चित् ।
इत्येवमुक्तः प्रेतस्तु वणिजं वाक्यमब्रवीत् ॥१८ ॥
पुन्नागमिममाश्रित्य प्रतीक्षस्व क्षणं मम ।
कृतातिथ्यो मया यावद्गमिष्यसि यथासुखम् ॥ १९ ॥
एवमुक्तस्तदा चक्रे स वणिक्तृष्णयान्वितः ।
मध्याह्नसमये प्राप्ते प्रेतस्तं देशमागमत् ॥ २० ॥
पुन्नागवृक्षाच्छीतोदां वारिधानीं मनोरमाम् ।
दध्योदनसुयुक्तेन वर्धमानेन संयुताम् ॥२१ ॥
अवतार्य ततस्त्वग्रं प्रददाति च यत्तदा ।
ततोऽग्रमात्रेण वणिक्परां तृप्तिमुपागतः ॥२२ ॥
वितृष्णो विज्वरश्चैवं क्षणेन समपद्यत ।
ततः प्रेतेषु सर्वेषु क्रमाद्भागं तदा ददौ ॥२३ ॥
दध्योदनात्सपानीयात्तेऽपि तृप्तिं परां ययुः ।
अथ सन्तर्पयित्वा तु प्रेतांस्तान्स तु सर्वशः ॥ २४ ॥

प्रेताधिपः स बुभुजे पश्चादन्नं यथासुखम् ।
तस्य भुक्तवतस्त्वन्नं पानीयं च क्षयं ययौ ॥२५॥
प्रेताधिपं ततस्तृप्तं वणिग्वचनमब्रवीत् ।
आश्चर्यमेतत्परमं वनेऽस्मिन्प्रतिभाति मे ॥२६॥
अन्नपानस्य सम्प्राप्तिः परमस्य कुतस्तव ।
स्तोकेन च तथान्नेन बिभर्षि च बहून्कथम् ॥२७॥
तृप्ता अपि कथं सर्वे निर्मांसा भिन्नकुक्षयः ।
कश्चित्त्वमस्यां घोरायामटव्यां तु कृतालयः ॥२८॥
एतन्मे संशयं छिन्धि परं कौतूहलं हि मे ।
एवमुक्तः स वणिजा प्रेतो वचनमब्रवीत् ॥२९॥
वाणिज्यसक्तस्य पुरा कालो ऽतीतो ममानघ ।
शाकले नगरे रम्ये नास्तिकस्य दुरात्मनः ॥ ३०॥
धनलोभान्मया तत्र न कदाचिदपि प्रभो ।
दत्तासीद्भिक्षवे भिक्षा कृपणेन कथञ्चन ॥ ३१॥
प्रातिवेश्यश्च तत्रासीद्ब्राह्मणो गुणवान्मम ।
श्रवणद्वादशीयोगे मासि भाद्रपदे तदा ॥ ३२॥
स कदाचिन्मया सार्धं तौषीं नाम नदीं ययौ ॥
तस्याश्च सङ्गमः पुण्यो यत्रासीच्चन्द्रभागया ॥ ३३॥
चन्द्रभागासरिच्छ्रेष्ठा यत्र शीतामलोदका ।
महादेवजटाजूटे गङ्गा निपतिता पुरा ॥३४॥
चन्द्रेण भागतो न्यस्ता चन्द्रभागा स्मृता ततः ।
तत्कालतप्तसलिला तौषी तत्रार्कनन्दिनी ॥३५॥

शीतोष्णे चोदके तस्मिन्संगमे सुमनोहरे ॥
तं स देशं समासाद्य प्रातिवेश्यमसौ द्विजः ॥३६ ॥
श्रवणद्वादशीयोगे स्नानार्चन उपोषितः ॥
चान्द्रभागस्य तोयस्य वारिधानी नवा दृढा ॥३७ ॥
दध्योदनयुतैः सार्धं सम्पूर्णैर्वर्धमानकैः ।
छत्रैश्चोपानहै रम्यैर्वस्त्रैश्च विविधैर्युता ॥३८ ॥
प्रददौ विप्रमुख्येभ्यो रहस्यज्ञो महीपतिः ॥
चित्तसंरक्षणार्थाय तस्यापि च तदा मया ॥३९ ॥
सोपवासेन दत्तैका वारिधानी नवा दृढा ॥
चान्द्रभागस्य तोयस्य दध्योदनयुता तदा ॥ ४० ॥
गत्वा गृहमनुप्राप्य ततः कालेन केनचित् ॥
पञ्चत्वमहमासाद्य नास्तिक्यात्प्रेततां गतः ॥४१ ॥
अस्यामटव्यां घोरायां यो वा ह्यकुशलस्तदा ।
श्रवणद्वादशीयोगे दत्ता यासौ मयानघ ॥ ४२ ॥
दध्योदनयुता रम्या वारिधानी नवा दृढा ॥
सेयं मध्याह्नसमये दिवसे दिवसे मम ॥४३ ॥
उपतिष्ठेत्सदैवेह यथा दृष्टा त्वयानघ ।
ब्रह्मस्वहारिणस्त्वेते पापाः प्रेतत्वमागताः ॥ ४४ ॥
परिदाररताः केचित्स्वामिद्रोहरता परे ॥
मित्रद्रोहरताः केचिद्देशेऽस्मिन्भृशदारुणे ॥४५ ॥
ममानुयानं कुर्वन्ति अन्नपान कृतेऽनघ ।
अक्षयो भगवान्विष्णुः परमात्मा सनातनः ॥४६ ॥

तमुद्दिश्य तु यद्दत्तं तदक्षय्यं प्रकीर्तितम् ॥
अक्षय्येन तथान्नेन तृप्ता अपि हि मानद ॥४७ ॥
प्रेतभावेन दौर्बल्यं न विमुञ्चन्ति कर्हिचित् ।
अहं च पूजयित्वा त्वामतिथिं समुपस्थितम् ॥४८ ॥
प्रेतभावाद्विनिर्मुक्तो यास्यामि परमां गतिम् ।
मया विहीनाः प्रेतास्तु वनेऽस्मिन्भृशदारुणे ॥४९ ॥
पीडामनुभविष्यन्ति दारुणां कर्मयोगजाम् ॥
एतेषां त्वं महाभाग भदनुग्रहकाम्यया ॥ ५० ॥
प्रत्येकं गोत्रनामानि गृह्णीष्व लिखितेन च ।
अस्ति कक्ष्यागतवेषा तव सा पुस्तिका शुभा ॥५१ ॥
हिमवन्तमथासाद्य तत्र त्वं लप्स्यसे निधिम् ।
गयाशीर्षे ततो गत्वा श्राद्धं कुरु महामते ॥५२ ॥
एकैकं त्वमथोद्दिश्य प्रेतं प्रेतं यथासुखम् ।
ततस्तु ते विमोक्ष्यन्ति प्रेत भावमसंशयम् ॥५३ ॥
इत्येवं स वदन्नेव तप्तजाम्बूनदप्रभः ।
विमानवरमास्थाय स्वर्गलोकं ततो गतः ॥ ५४ ॥
स्वर्चिते प्रेतनाथे तु प्रेतानां स वणिक्क्रमात् ।
नामगोत्राणि सङ्गृह्य प्रयातः स हिमालयम् ॥५५ ॥
तत्र प्राप्य निधिं गत्वा निक्षिप्य च तथा गृहे ।
धनं किञ्चिदुपादाय गयाशीर्षं ततो ययौ ॥५६ ॥
प्रेतानां क्रमशस्तत्र चक्रे श्राद्धं दिनेदिने ।
यस्ययस्य यदा श्राद्धं करोति स महान्वणिक् ॥५७ ॥

सस तस्य तदा स्वप्ने दर्शयत्यात्मनस्तनुम् ।
ब्रवीति च महाभाग प्रसादेन तवानघ ॥ ५८ ॥
प्रेतभावो मया त्यक्तः प्राप्तोऽस्मि त्रिदिवं ध्रुवम् ।
कृत्वा स धनदानेन प्रेतानां निष्कृतिं वणिक् ॥ ५९ ॥
जगाम स्वगृहं तत्र मासि भाद्रपदे तदा ।
श्रवणद्वादशीयोगे पूजयित्वा जनार्दनम् ॥ ६० ॥
धनं च दत्त्वा विप्रेभ्यः सोपवासो जितेन्द्रियः ।
पुण्येषु सततं राजन्नदीनां सङ्गमेषु च ॥ ६१ ॥
गङ्गासरय्वोर्गङ्गायाः शोणस्य च महामतिः ।
इक्षुमत्याश्च गङ्गाया गङ्गायमुनयोस्तथा ॥ ६२ ॥
गोमत्याश्च सरय्वाश्च कौशिकीगण्डक्योस्तथा ।
विपाशया देवह्रदा यत्र योगं प्रपद्यते ॥ ६३ ॥
विपाशा च तथा योगं यत्र याति शतद्रुणा ।
इरावती तथा योगं यत्र व्रजति सिन्धुना ॥ ६४ ॥
चन्द्रभागा च व्रजति यत्र योगं वितस्तया ।
महासिन्धुश्च संयोगं यत्र याति वितस्तया ॥ ६५ ॥
प्रत्यब्दं यावदेतेषु संगमेषु महावणिक् ।
करोति विधिवद्दानं यावद्दिष्टान्तमागतः ॥ ६६ ॥
अवाप परमं स्थानं दुर्लभं यत्तु जन्तुभिः ।
यत्र कामफला वृक्षा नद्यः पायसकर्दमाः ॥ ६७ ॥
शीतलामलपानीयाः पुष्करिण्यो मनोहराः ।
सुवर्णसिकता राजन्मणिसोपानभूषिताः ॥ ६८ ॥

आनन्त्याय स संप्राप्तो देशं तं भूरिदक्षिणः ।
तं देशमासाद्य वणिङ्महात्मा सुतप्तजाम्बूनदभूषिताङ्गः ।
कल्पं समग्रं मुदितो यदात्मा रेमे स रामाभियुतः कृतात्मा ॥६९ ॥
विमानैरप्सरोभिश्च सिद्धगन्धर्वसेवितः ।
विष्णुलोकमवाप्नोति यावदाभूतसंप्लवम् ॥ ७० ॥
राजसूयादिभिर्यज्ञैर्यत्फलं समवाप्यते ।
श्रवणद्वादशीं कृत्वा तत्फलं लभते नरः ॥७१ ॥

इति श्रीविष्णुधर्मोत्तरेप्रथमखण्डे मार्कण्डेयवज्रसंवादे पिशाचमोक्षणे श्रवणद्वादशीमाहात्म्यवर्णनं १६२ ॥

## श्रीगरुडमहापुराणान्तर्गतं श्रवणद्वादशीमाहात्म्यम्

**ब्रह्मोवाच**

श्रवणद्वादशीं वक्ष्ये भुक्तिमुक्तिप्रदायिनीम् ।
एकादशी द्वादशी च श्रवणेन च संयुता ॥ १ ॥
विजया सा तिथिः प्रोक्ता हरिपूजादि चाक्षयम् ।
एक भक्तेन नक्तेन तथैवायाचितेन च ॥ २ ॥
उपवासेन भैक्ष्येण नैवाद्वादशिको भवेत् ।
कास्यं मांसं तथा क्षौद्रं लोभं वितथभाषणम् ॥ ३ ॥
व्यायामं च व्यवायं च दिवास्वप्नमथाञ्जनम् ।
शिलापिष्टं मसूरं च द्वादश्यां वर्जयेन्नरः ॥४ ॥
मासी भाद्रपदे शुक्ला द्वादशी श्रवणान्विता ।
महती द्वादशी ज्ञेया उपवासे महाफला ॥ ५ ॥

सङ्गम सरितां स्नानं बुधयुक्ता महाफला ।
कुम्भे सरत्ने सजले यजेत्स्वर्णं तु वामनम् ॥६ ॥
सितवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितम् ।
ओं नमो वासुदेवाय शिरः सम्पूजयेत्ततः ॥७ ॥
श्रीधराय मुखं तद्वत्कण्ठं कृष्णाय वै नमः ।
नमः श्रीपतये वक्षो भुजौ सर्वास्त्रधारिणे ॥८ ॥
व्यापकाय नमः कुक्षौ केशवायोदरं बुधः ।
त्रैलोक्यपतये मेढ्रं जङ्घे सर्वभृते नमः ॥९ ॥
सर्वात्मने नमः पादौ नैवेद्यं घृतपायसम् ।
कुम्भांश्च मोदकान्दद्याज्जागरं कारयेन्निशि ॥ १० ॥
स्नात्वाचान्तोऽर्चयित्वा तु कृतपुष्पाञ्जलिर्वदेत् ।
नमोनमस्ते गोविन्द बुध श्रवणसञ्ज्ञक ! ॥११ ॥
अघौघसङ्क्षयं कृत्वा सर्वसौख्यप्रदो भव ।
प्रीयतां देवदेवेशो विप्रेभ्यः कलशान्ददेत् ।
नद्यस्तीरेऽयः वा कुर्यात्सर्वान्कामानवाप्नुयात् ॥ १२ ॥

इति श्रीगारुडे महापुराणे पुर्वखण्डे प्रथमांशाख्ये आचारकाण्डे श्रवणद्वादशीव्रतनिरूपणं नाम षड्विंशदुत्तरशततमोऽध्यायः ।

## भविष्यपुराणे मध्यमपर्वणि-

# श्रवणद्वादशीनिर्णयः

श्रावणी द्वादशी शुक्ला चांद्रभद्रे यदा हरौ ।
तत्रोपोष्य हृषीकेशं पूजयेद्विधिवन्नरः ॥ ६४ ॥

श्रावणे चाश्विने चैव लभ्यते द्वादशीदिने ।
श्रवणेन समायुक्ता महती सा प्रकीर्तिता ॥६५ ॥
पुष्येण द्वादशीयुक्ता फाल्गुने विजया स्मृता ।
कार्तिके चेत्परित्याज्या माघे तु नारकी भवेत् ॥६६ ॥
या भाद्रे विजया प्रोक्ता श्रवणेन समायुता ॥
विशेषः कथ्यते तत्र यथावद्व्रतमाचरेत् ॥ ६७ ॥
एकादश्यामुत्तरतो द्वादशी च दिवान्विता ।
निशिपूर्णा द्वादशी च श्रवणेनापि संयुता ॥ ६८ ॥
सफला द्वादशी ज्ञेया उपोष्यैषा महाफला ॥६९ ॥
द्वादश्यां विष्णुविद्धायां वासुदेवं प्रपूजयेत् ।
कृष्णायां तु व्रतं कुर्याद्बहुदुःखं समाचरेत् ॥७० ॥
द्वादशी कामविद्धा चेन्मन्यते नाप्युपोषणम् ।
हन्यात्पुराकृतं पुण्यं त्रयोदश्यामुपोषणम् ॥७१ ॥
प्रहरेप्रहरे स्नानं शर्वर्यां च विधीयते ।
पूजनं चाग्निकार्यं च षड्गु कार्यं व्रती चरेत् ॥७२ ॥
एकादशीं द्वादशीं च प्राप्नोति श्रवणे यदि ।
एकादश्यामुपोष्याथ द्वादश्यामप्युपावसेत् ॥७३ ॥
पारणं तु त्रयोदश्यां द्वादशी चेन्न लभ्यते ।
आमिषान्नं न भुञ्जीत हविष्यान्नेन पारणम् ॥७४ ॥
यदा तु पारणायोग्या लभ्यते द्वादशी तदा ।
तस्यां नातिक्रमो युक्तस्तदभावे त्रयोदशी ॥ ७५ ॥
एकादशी द्वादशी च श्रवणर्क्षेण संयुता ।

विष्णुश्रृंखलको नाम बुधवारे विशिष्यते ॥ ७६ ॥
दशम्यां संयतो भूत्वा प्रातरेकादशीदिने ।
कृत्वा तु सङ्गमे स्नानं प्रहरेप्रहरे द्विजाः ॥ ७७ ॥
अनेन विधिना कृत्वा विजयायां व्रतोत्तमम् ।
सर्वपापं क्षयं नीत्वा विष्णुलोके वसेन्नरः ॥ ७८ ॥
चतुर्युगानां दिव्यानां यावत्स्याद्विष्णुरूपधृक ।
तावदेव हि सर्वत्र सार्वभौमो भवेन्नरः ॥ ७९ ॥
त्रेतायां दशजन्मानि मध्यदेशेषु भो द्विजाः ।
ततश्च भारते वर्षे वेदवेदांतसारवित् ।
पुत्रपौत्रधनैर्युक्तो लक्षदो नृपसन्निभः ॥ ८० ॥
जायते दश जन्मानि त्रेतायां ब्राह्मणोत्तमः ।
सपत्नीकश्च दीर्घायुर्धर्मकर्मसु पूजितः ॥ ८१ ॥

----------------------

## वराहपुराणान्तर्गतः

# श्रवणद्वादशीपूजाक्रमः-

श्रीवराह उवाच

पुनरन्यत्प्रवक्ष्यामि महापातकनाशनम् ॥
सङ्गमस्य प्रभावं हि पापिनामपि मुक्तिदम् ॥ १ ॥
अत्रैव श्रूयते पूर्वं ब्राह्मणः संशितव्रतः ॥
महानामेति विख्यातः स्थितोऽसौ वनमाश्रितः ॥ २ ॥
स्वाध्याययुक्तो होमे च नित्ययुक्तः सः योगवित् ॥

जपहोमपरो नित्यं स्वकालं क्षपते च सः ॥ ३ ॥
एवं कर्माणि कुर्वन्स ब्रह्मलोकजिगीषया ॥
बहून्यब्दान्यतीतानि ब्राह्मणस्य वने तदा ॥ ४ ॥
तस्य बुद्धिरियं जाता तीर्थाभिगमनं प्रति ॥
पुनस्तीर्थजलैरेतत्क्षालयामि कलेवरम् ॥ ५ ॥
प्रयातो विधिवत्साक्षात् सूर्यस्योदयनं प्रति ॥
असिकुण्डादितः कृत्वा दक्षिणां कोटिकां ततः ॥६ ॥
तथा चोत्तरकोट्यां तु तथा मन्माथुरं च यत् ॥
क्रमेण सर्वतीर्थानि स्नात्वा मामपि पुष्करम् ॥ ७ ॥
गत्वा सर्वाणि तीर्थानि स्नात्वा पूतो भवाम्यहम् ॥
इति कृत्वा मथुराया निर्जगामाथ स द्विजः ॥ ८ ॥
कृतपूजानमस्कारः अध्वानं प्रत्यपद्यत ॥
अध्वप्रपन्नो ह्यद्दशत्पञ्चप्रेतान्सुभीषणान् ॥ ९ ॥
अरण्ये कण्टकवृते निर्जने शब्दवर्जिते ॥
तान्दृष्ट्वा विकृताकारानतितीव्रभयङ्करान् ॥ १० ॥
ईषदुत्त्रस्तहृदयस्तिष्ठदुन्मील्य चक्षुषी ॥
आलम्ब्य स ततो धैर्यं त्रासमुत्सृज्य दूरतः ॥ ११ ॥
पप्रच्छ मधुरालापः के यूयं रौद्रमूर्त्तयः ॥
भवन्तः कर्मणा केन दुष्कृतेन भयावहाः ॥ १२ ॥
एकस्थानात्सदा यूयं प्रस्थिताः कुत्र वा सदा ॥

प्रेता ऊचुः

क्षुत्पिपासातुरा नित्यं बहुदुःखसमन्विताः ॥ १३ ॥

दुर्बुद्ध्या च वृताः सर्वे हीनज्ञाना विचेतसः ॥
न जानीमो दिशं काचिद्विदिशं चापि चाध्वनि ॥ १४ ॥
नान्तरिक्षं महीं चापि जानीमो दिवसं तथा ॥
यदेतद्दुःखमापन्नं सुखोदर्कफलं भवेत् ॥ १५ ॥
अप्रकाममिदं भाति भास्करोदयनं प्रति ॥
अहं पर्युषितो नाम परः सूचीमुखस्ततः ॥ १६ ॥
शीघ्रगो रोधकश्चैव पञ्चमो लेखकस्तथा ॥

**ब्राह्मण उवाच**

प्रेतानां कर्मजातानां नाम्नां वै सम्भवः कुतः ॥१७ ॥
किं तत्कारणमेतद्धि यूयं सर्वे सनामकाः ॥

**प्रेत उवाच**

अहं स्वादु सदाश्नामि दध्नि पर्युषितं द्विजे ॥ १८ ॥
एतत्कारणमुद्दिश्य नाम पर्युषितं द्विज ॥
सूचीता बहवोऽनेन विप्राश्चान्नादिकाङ्क्षिणः ॥१९ ॥
एतत्कारणमुद्दिश्य परः सूचीमुखस्ततः ॥
समर्थितो द्विजेनैव शीघ्रं याति यतो हि सः ॥ २० ॥
एतत्कारणमुद्दिश्य शीघ्रगस्तेन सोच्यते ॥
एको गृहस्य मध्ये तु भुङ्क्ते द्विजभयेन हि ॥ २१ ॥
समारुह्योद्विग्नमना रोधकस्तेन चोच्यते ॥
मौनेनापि स्थितो नित्यं याचितोऽपि लिखेन्महीम् ॥ २२ ॥
अस्माकमपि पापिष्ठो लेखकस्तेन नाम वै ॥
मदेन लेखको याति रोधकस्तु ह्यवाक्छिराः ॥ २३ ॥

शीघ्रगः पङ्गुतां प्राप्तः परं सूचीमुखस्ततः ॥
उषितः केवलग्रीवो लम्बौष्ठो वै महोदरः ॥ २४ ॥
बृहद्वृषणशुष्काङ्गः पापादेव प्रजायते ॥
एतत्ते सर्वमाख्यातमात्मवृत्तान्त सम्भवम् ॥ २५ ॥
यदि ते श्रवणे श्रद्धा पृच्छ चान्यद्यदिच्छसि ॥

**ब्राह्मण उवाच**

ये जीवा भुवि तिष्ठन्ति सर्व आहारजीविनः ॥२६ ॥
युष्माकमपि चाहारं श्रोतुमिच्छामि तत्त्वतः ॥

**प्रेता ऊचुः**

श्रृणु चाहारमस्माकं सर्वभूतदयापर ॥ २७ ॥
यच्छ्रुत्वा निन्दसे नित्यं भूयो भूयश्च नित्यशः ॥
श्लेष्ममूत्रपुरीषेण योषितां च समन्ततः ॥ २८ ॥
गृहाणि त्यक्तशौचानि प्रेता भुञ्जन्ति तत्र वै ॥
बलिमन्त्रविहीनानि दानहीनानि यानि च ॥२९ ॥
गुरवो नैव पूज्यन्ते स्त्रीजितानि गृहाणि च ॥
यानि प्रकीर्णभाण्डानि प्रकीर्णोच्छेषणानि च ॥३० ॥
नित्यं च कलहो यत्र प्रेता भुञ्जन्ति तत्र वै ॥
अपात्रे प्रतिदत्तानि विधिहीनानि यानि च ॥
निन्दितानां द्विजातीनां जुगुप्सितकुलोद्भवे ॥ ३१ ॥
जातानां विहितानां च दुष्कृतं कर्म कुर्वताम् ॥
तेभ्यो दत्तं तदस्माकमुपतिष्ठति भोजने ॥ ३२ ॥
एतत्पापतरं चान्यद्भोजनं दुष्टकर्मिणाम् ॥

निर्विण्णाः प्रेतभावेन पृच्छामः सुदृढव्रत ॥ ३३ ॥
प्रेतो यथा न भवति तथा ब्रूहि तपोधन ॥

ब्राह्मण उवाच

एकरात्रत्रिरात्रेण कृच्छ्रचान्द्रायणादिभिः ॥ ३४ ॥
व्रतैरभ्युद्यतः पूतो न प्रेतो जायते नरः ॥
मिष्टान्नपानदाता च सततं श्रद्धयान्वितः ॥ ३५ ॥
यतीनां पूजको नित्यं न प्रेतो जायते नरः ॥
त्रीनद्भिः पञ्च चैकं वा प्रतिनित्यं तु पोषयेत् ॥३६ ॥
सर्वभूतदयालुश्च न प्रेतो जायते नरः ॥
देवातिथिषु पूजासु गुरुपूजासु नित्यशः ॥३७ ॥
रतो वै पितृपूजायां न प्रेतो जायते नरः ॥
जितक्रोधो ह्यमात्सर्यस्तृष्णासङ्गविवर्जितः ॥ ३८ ॥
क्षमायुक्तो दानशीलो न प्रेतो जायते नरः ॥
एकादशीं सितां कृष्णां सप्तमीं वा चतुर्दशीम् ॥ ३९ ॥
उपवासपरो नित्यं न स प्रेतोऽभिजायते ॥
गां ब्राह्मणं च तीर्थानि पर्वतांश्च नदीस्तथा ॥४० ॥
देवांश्च वन्दते नित्यं न प्रेतो जायते हि सः ॥
प्रेता ऊचुः ॥
त्वत्तस्तच्छ्रुतमस्माभिर्यो न प्रेतोऽभिजायते ॥ ४१ ॥
प्रेतस्तु जायते केन तद्वद त्वं महामुने ॥
विप्र उवाच ॥
शूद्रान्नेन तु भुक्तेन ब्राह्मणो म्रियते यदि ॥ ४२ ॥

तेनैव चोदरस्थेन स प्रेतो जायते ध्रुवम् ॥
नग्नकापालिपाषण्डसङ्गतासनभोजनैः ॥४३॥
मनुष्यः प्रेततां याति स्पर्शेन सुतरां तथा ॥
पूर्वपुण्यं विनश्येत्तु प्रेतो भवति नित्यशः ॥४४॥
पाषण्डाश्रमसंस्थश्च मद्यपः पारदारिकः ॥
वृथामांसरतो नित्यं स च प्रेतोऽभिजायते ॥ ४५ ॥
देवस्वं ब्राह्मणस्वं च गुरोर्द्रव्यं हरेत्तु यः ॥
कन्यां ददाति शुल्केन स च प्रेतोऽभिजायते ॥ ४६ ॥
मातरं पितरं भ्रातृभगिन्यौ च स्त्रियं सुतम् ॥
अदुष्टान्यस्त्यजेत्सोऽपि प्रेतो भवति च ध्रुवम् ॥ ४७ ॥
अयाज्ययाजनाच्चैव याज्यानां परिवर्जनात् ॥
रतो वा शूद्रसेवायां स प्रेतो जायते नरः ॥ ४८ ॥
ब्रह्महा च कृतघ्नश्च गोघ्नो वै पञ्चपातकी ॥
भूमिकन्यापहर्ता च स प्रेतो जायते नरः ॥ ४९ ॥
गुरोर्धर्म्मोपदेष्टुश्च नित्यं हितमभीप्सतः ॥
न करोति वचस्तस्य स प्रेतो जायते नरः ॥ ५० ॥
असद्भ्यः प्रतिगृह्णाति नास्तिकेभ्यो विशेषतः ॥
स पापो जायते प्रेत आहारादिविवर्जितः ॥५१ ॥

प्रेता ऊचुः

य एतत्कर्म कुर्वन्ति मूढाऽधर्मपरायणाः ॥
विरुद्धकारिणः पापास्तेषां काञ्चिद्गतिं वद ॥ ५२ ॥

ब्राह्मण उवाच

ये धर्मविमुखा मूढा दयादानविवर्जिताः ॥
तेषां गतिर्भवेदेका मथुरायान्तु सङ्गमे ॥ ५३ ॥
श्रवणद्वादशीयोगे मासि भाद्रपदे तथा ॥
वामनं तत्र देवं तु पूजयेज्जुहुयात्तथा ॥ ५४ ॥
सुवर्णमन्नं वस्त्रं च च्छत्रोपानत्सुसंयुतम् ॥
तत्र स्नातो पितॄंस्तर्प्य दत्त्वा करकमेव च ॥५५ ॥
न ते प्रेता भविष्यन्ति मार्गस्थो यो नमस्यते ॥
विमानवरमारुह्य विष्णुलोकं स गच्छति ॥ ५६ ॥
तत्र तीर्थे नरः स्नातो हृष्टपुष्टो यथाश्रुतः ॥
ध्यातश्च कीर्त्तितो वापि तेन गङ्गावगाहिता ॥ ५७ ॥
तीर्थस्यैव तु माहात्म्यं प्रेतो भूत्वा श्रृणोति यः ॥
तस्याक्षयपदं विष्णोर्भवतीति मया श्रुतम् ॥५८ ॥
प्रेता ऊचुः ॥
अस्माकं वद कल्याण व्रतस्यास्य विधिं परम् ॥
येन वै क्रियमाणेन प्रेतत्वात्तु विमुच्यते ॥५९ ॥

**ब्राह्मण उवाच**

एवमेव व्रतस्यास्य विधानं कर्मसंहितम् ॥
पुराणं कथितं राज्ञे मान्धात्रे पृच्छते पुरा ॥६० ॥
वसिष्ठेन महाभागाः श्रृणुध्वं कथयाम्यहम् ॥
प्रेतानां मोक्षणं पुण्यं गतिप्रवरदायकम् ॥ ६१ ॥
मासि भाद्रपदे शुद्धा द्वादशी श्रवणान्विता ॥
तस्यां दत्तं हुतं स्नानं सर्वं लक्षगुणं भवेत् ॥ ६२ ॥

सङ्गमे च पुनः स्नात्वा पूजयित्वा तु वामनम् ॥
कलशं विधिना दत्त्वा तस्य पुण्यफलं शृणु ॥ ६३ ॥
कपिलानां शतं दत्त्वा हिरण्योपस्कराञ्चितम् ॥
तेन यत्फलमाप्नोति तद्वादश्यामखण्डितम् ॥ ६४ ॥
राक्षसत्वं न गच्छेत्तु श्रवणद्वादशीव्रतात् ॥
स्वर्गे च वसते तावद्यावदिन्द्राश्चतुर्दश ॥ ६९ ॥
ततः स्वर्गात्परिभ्रष्टो ब्राह्मणो वेदपारगः ॥
जातिस्मरो महायोगी मोक्षमार्गपरायणः ॥ ६६ ॥
ध्यानयुक्तेन भावेन मुक्तो यात्यपुनर्भवम् ॥
कनकं च सुसम्पीतं सान्नं रत्नसमन्वितम् ॥ ६७ ॥
यथालाभोपपन्नेन सौवर्णो वामनः कृतः ।
उपानच्छत्रसंयुक्तो विधिमन्त्रपुरःसरः ॥ ६८ ॥
कृत्वा च विधिवत्तस्य स्नानपूजादिकं नरः ॥
मन्त्रैस्तथाविधैर्होमैर्ब्राह्मणं चोपपादयेत् ॥ ६९ ॥
आगच्छ वरदानन्त श्रीपते मदनुग्रहात् ॥
सर्वगोपि निजांशेन स्थानमेतदलङ्कुरु ॥७० ॥

(आवाहनम्)

यत्त्वं नक्षत्ररूपेण दवादश्यां नभसि स्थितः ॥
तन्नक्षत्रमहं वन्दे मनोवाञ्छितसिद्धये ॥ ७१ ॥

( नक्षत्रम्)

नमः कमलनाभाय कमलालय केशव ॥

( स्नानम् )

अमूर्त्ते सर्वतो व्यापिन्नारायण नमोऽस्तु ते ॥ ७२ ॥

सर्वव्यापिन्जगद्योने नमः सर्वमयाच्युत ॥

**पूजा**

श्रवणद्वादशीयोगे पूजां गृह्णीष्व केशव ॥ ७३ ॥

धूपोऽयं देवदेवेश शङ्खचक्रगदाधर ॥

**(धूपं)**

अच्युतानन्त गोविन्द वासुदेव नमोऽस्तु ते ॥ ७४ ॥

तेजसा सर्वलोकाश्च विवृताः सन्तु तेऽव्ययाः ॥

**दीपम्**

त्वं हि सर्वगतं तेजो जनार्दन नमोऽस्तु ते ॥७५॥

अदितेर्गर्भमाधाय वैरोचनिशमाय च ॥

त्रिभिः क्रमैर्जिता लोका वामनाय नमोऽस्तु ते ॥ ७६॥

**(नैवेद्यम्)**

देवानां सम्मतश्चापि योगिनां परमां गतिः ॥

जलशायी जगद्योने अर्घ्यं मे प्रति गृह्यताम् ॥ ७७ ॥

**( अर्घ्यम्)**

हव्यभुग्घव्यकर्त्ता त्वं होता हव्यं त्वमेव च ॥

सर्वमूर्त्ते जगद्योने नमस्ते केशवाय च ॥ ७८ ॥

**इति स्वाहाकारः**

हिरण्यमन्नं त्वं देव जलवस्त्रमयो भवान् ॥ ( दक्षिणाम्)।

उपानच्छत्रदानेन प्रीतो भव जनार्दन ॥ ७९ ॥

**छत्रादिदानम्**

पर्जन्यो वरुणः सूर्यः सलिलं केशवः शिवः ॥
अग्निर्वैश्रवणो देवः पापं हरतु मेऽव्ययः ॥ ८० ॥

वामनस्तुतिः

अन्नं प्रजापतिर्विष्णुरुद्रचन्द्रेन्द्रभास्कराः ॥
अन्नं त्वष्टा यमोऽग्निश्च पापं हरतु मेऽव्ययः ॥ ८१ ॥

करकदानं

वामनो बुद्धिदाता च द्रवस्थो वामनः स्वयम् ॥
वामनस्तारकोभाभ्यां वामनाय नमोऽस्तु ये ॥ ८२ ॥

यजमानः

वामनं प्रतिगृह्णामि वामनो मे प्रयच्छति ॥
वामनस्तारकोभाभ्यां वामनाय नमो नमः ॥ ८३ ॥

द्विजः प्रतिग्रहीता

कपिलाङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ॥
दत्त्वा कामदुघां लोका भवन्ति सफला नृणाम् ॥८४ ॥

गोदानं

मम पापच्छिदे तुभ्यं देवगर्भ सुपूजित ॥
मया विसर्जितो देव स्थानमन्यदलङ्कुरु ॥८५ ॥

(विसर्जनम्)

एवं विद्वांस्तु द्वादश्यां यो नरः श्रद्धयान्वितः ॥
यत्र तत्र नभस्ये तु कृत्वा फलमवाप्नुयात् ॥ ८६ ॥

ब्राह्मण उवाच

यस्तु सारस्वते तीर्थे यमुनायाश्च सङ्गमे ॥

करोति विधिनानेन तस्य पुण्यं शतोत्तरम् ॥८७॥
मयापि श्रद्धया चैतत्कालं तीर्थस्य सेवनम् ॥
क्षेत्रसन्न्यासरूपेण कृतभक्तिसमन्वितम् ॥८८॥
येन यूयं न शक्ता मां बाधितुं पापकर्मिणः ॥
श्रवणद्वादशीयोगे व्रतं तिथिसमन्वितम् ॥ ८९ ॥
तावद्व्रतं तु कर्त्तव्यं यावदेकं क्षयं व्रजेत् ॥
तीर्थस्यैव प्रभावो हि प्रत्यक्षमिह दृश्यते ॥९० ॥
श्रवणाद्वो गतिः साक्षात्साधु लक्ष्यामि चाऽधुना ॥

श्रीवराह उवाच

एवं ब्रुवति विप्रे तु आकाशे दुन्दुभिस्वनः ॥
पुष्पवृष्टिर्भुव्यपतद्देवैर्मुक्ता सहस्रशः ॥९१ ॥
प्रेतानां तु विमानानि आगतानि समन्ततः ॥
देवदूत उवाचेदं प्रेतानां शृण्वतां तदा ॥९२॥
अस्य विप्रस्य सम्भाषात्पुण्यसत्कीर्त्तितेन च ॥
प्रेतभावविमुक्ताः स्थ तीर्थस्य श्रवणादपि ॥९३॥
तस्मात्सर्वप्रयत्नेन सता सम्भाषणं वरम् ॥
कर्त्तव्यस्तीर्थभावश्च व्रतभावश्च मानसे ॥९४॥
तीर्थाभिषेकिपुरुषाद्यथा तेषां दुरात्मनाम् ॥
प्रेतानामक्षयः स्वर्गः सरस्वत्याश्च सङ्गमात् ॥९५॥
प्राप्तं तीर्थप्रभावस्य श्रवणान्मुक्तिदं फलम् ॥
तिलकं सर्वधर्माणां पञ्चप्रेतत्वमुक्तिदम् ॥९६॥
यः पठेत्परया भक्त्या शृणुयाद्भक्तितत्परः ॥

करोति श्रद्धया युक्तो न प्रेतो जायते नरः ॥९७॥
पिशाचसञ्ज्ञकं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥
यस्य श्रवणमात्रेण न प्रेतो जायते नरः ॥९८॥
इति श्रीवराहपुराणे मधु० मा० सर्वतीर्थे यमुनासङ्गमप्रभावोनाम
चतुःसप्तत्यधिकशततमोऽध्यायः ॥

## वराहपुराणान्तर्गतम्

# श्रवणद्वादशीव्रतविधानम्

दुर्वासा उवाच

श्रावणस्य तु मासस्य शुक्लपक्षे तु द्वादशी ।
अर्चयेत् परमं देवं गन्धपुष्पैर्जनार्नम् ॥ १ ॥
दामोदराय पादौ तु हृषीकेशाय वै कटिम् ।
सनातनेति जठरमुरः श्रीवत्सधारिणे ॥ २ ॥
चक्रपाणयेति भुजौ कण्ठं च हरये तथा ।
मुञ्जकेशाय च शिरो भद्रायेति शिखां तथा ॥ ३ ॥
एवं संपूज्य संस्थाप्य कुम्भं पूर्ववदेव तु ।
विन्यस्य वस्त्रयुग्मं तु तस्योपरि ततो न्यसेत् ॥४ ॥
काञ्चनं देवदेवं तु दामोदरसनामकम् ।
तमभ्यर्च्य विधानेन गन्धपुष्पादिभिः क्रमात् ॥ ५ ॥
प्राग्वत् तं ब्राह्मणे दद्याद् वेदवेदाङ्गपारगे ।
एवं नियमयुक्तस्य प्रभावं तच्छृणुष्व मे ॥ ६ ॥
एष ते विधिरुद्दिष्टः श्रावणे मासि वै विभो ।

एतस्याश्च प्रभावं यत् श्रृणु पापप्रणाशनम् ॥ ७ ॥
पुरा कृतयुगे राजा नृगो नाम महाबलः ।
बभ्राम स वनं घोरं मृगयासक्तमानसः ॥ ८ ॥
स कदाचित् तुरङ्गेण हृतो दूरं महद्वनम् ।
व्याघ्रसिंहगजाकीर्णं दस्युसर्पनिषेवितम् ॥ ९ ॥
एकाकी तत्र राजा तु अश्वं मुच्य तरोरधः ।
स्वयं कुशमथास्तीर्य सुप्तो दुःखसमन्वितः ॥ १० ॥
तावत् तत्रैव लुब्धानां सहस्राणि चतुर्दश ।
आगतानि मृगान् हन्तुं रात्रौ राज्ञः समन्ततः ॥ ११ ॥
तत्रापश्यन्त ते सुप्तं हेमरत्नविभूषितम् ।
नृगं राजानमत्युग्रं श्रिया परमया युतम् ॥१२ ॥
ते गत्वा त्वरितं व्याधाः स्वभर्त्रे संन्यवेदयन् ।
सोऽपि रत्नसुवर्णार्थं राजानं हन्तुमुद्यतः ॥ १३ ॥
तुरगस्य च हेतोस्तु निस्त्रिंशा वनचारिणः ।
राजानं सुप्तमासाद्य निगृहीतुं प्रचक्रमुः ॥ १४ ॥
तावद् राज्ञः शरीरात् तु श्वेताभरणभूषिता ।
नारी काचित् समुत्तस्थौ स्रक्चन्दनविभूषिता ।
उत्थाय चक्रमादाय ते म्लेच्छा विनिपातिताः ॥ १५ ॥
दस्यून् निहत्य सा देवी तस्य राज्ञस्तनुं पुनः ।
प्रविशन्त्याशु राजाऽपि प्रतिबुद्धोऽथ दृष्टवान् ।
म्लेच्छांस्तु निहतान् दृष्ट्वा सा स्वमूर्त्तिलयं गता ॥ १६ ॥
अश्वमारुह्य स पुनर्वामदेवाश्रमं ययौ ।

तत्रापृच्छद् ऋषिं भक्त्या का स्त्री के ते निपातिताः ।
एतत् कार्यमृषे मह्यं कथयस्व प्रसीद मे ॥ १७ ॥

वामदेव उवाच

त्वमासीच्छूद्रजातीय अन्यजन्मनि पार्थिव ।
तत्र त्वया ब्राह्मणस्य प्रेषणं कुर्वता श्रुता ।
श्रावणस्य तु मासस्य शुक्लपक्षे तु द्वादशी ॥ १८ ॥
सविधानात् त्वया राजन् भक्त्या वै समुपोषिता ।
उपोषितायां तस्यां तु राज्यं लब्धं त्वयाऽनघ ॥ १९ ॥
सर्वापत्सु च सा देवी भवन्तं परिरक्षति ।
यया विनिहताः क्रूरा म्लेच्छाः पापसमन्विताः ।
भवांश्च रक्षितो राजन् श्रावणद्वादशी तु सा ॥ २० ॥
एकैव पाति चापत्सु राज्यमेकैव यच्छति ।
किं पुनर्द्वादशैतास्तु येनैन्द्रं न ददुः पदम् ॥ २१ ॥

॥ इति श्रीवराहपुराणे भगवच्छास्त्रे सप्तचत्वारिंशोऽध्यायः ॥